Patañjali also names the preservation of the Veda as the first of the compelling reasons for studying grammar (see Cardona 1997a: 544-545). To be sure, this does involve checking Vedic expressions. Consider again forms of the type *du̱hra̱te̱*, *du̱hre* (see §6). Someone who is a native speaker of the accepted correct speech, where forms with *-ate* are the norm, could possibly consider such forms deviant, but one who knows grammar does not commit this fault. As Kaiyaṭa notes, such a person knows that Pāṇini's grammar accounts for them.[49] This in no way implies that Pāṇini's grammar must be a system that begins with preliminary utterances which can be checked for correctness. It means simply that a grammarian conversant with Pāṇini's derivational system knows that this accounts for such Vedic forms in a particular manner. In the same vein, the fact that Patañjali also invokes the modification (*ūha*) of mantras in particular contexts does not require that Pāṇini's system conform to what Houben claims. For example, if a mantra contains the dative form *a̱gnayè* in one context and another context calls for a corresponding form of the stem *sū́rya-*, any native speaker knows that the form in question is *sūryā̀ya*.[50] One who also knows Pāṇini's grammar is capable of modifying a mantra with a knowledge of how the grammar accounts for the forms. Both forms involve nominal stems followed by the ending ***ṅ**e*. After a stem in *-a*, this ending is replaced by *ya*, which then conditions the substitution of a long vowel *-ā* in the stem,[51] but an ending marked with *ṅ* conditions replacement by a guṇa vowel for the

48. ... प्रकृत्यादिविभागज्ञानपूर्वकः प्रयोग इत्यर्थः । (Pr. I.40).
49. लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्रामयेदवैयाकरणः । वैयाकरणस्तु न भ्रमति । (Pr. I.8). Kaiyaṭa illustrates with *aduhra*, the imperfect corresponding to *duhre*, and cites the pertinent rules. In his Mahābhāṣyadīpikā, Bhartṛhari illustrates with several examples; I do not go into these so as not to take up more space.
50. Kaiyaṭa (Pr. I.9) cites the two forms and Vedic texts in which they are used. Bhartṛhari goes into much more detail concerning ūha. Again, it is not necessary to consider all the details in the present discussion.
51. A 7.1.13: ङेर्यः (अतः 9, अङ्गस्य 6.4.1); 7.3.102: सुपि च (अतो दीर्घो यञि 101).

final *-i* of a stem that belongs to the ghi class:[52] *sūrya-e* → *sūrya-ya* → *sūryāya*, *agni-e* → *agne-e* → *agnaye*.[53]

In sum, Houben has not presented cogent evidence supporting his claims. What he adduces in support of these claims is equally well explained by understanding Pāṇini's system in the way that Pāṇinīyas have understood it from the times of earliest commentators onwards. There is also additional evidence (see §5) which cannot be explained under Houben's thesis except on the assumption that these scholars all misunderstood Pāṇini and Houben alone has understood how Pāṇini's grammar operates. Houben has not demonstrated that such an assumption is warranted. Hence, it is proper to reject Houben's attempt to demonstrate that Pāṇini's system does not operate in the manner accepted by Pāṇinīyas and most modern scholars. It is appropriate to accept that Pāṇini's is a derivational system which starts with meanings to be expressed by utterances that are accounted for by combining bases and affixes under stated conditions.[54]

**8.** Summary

Pāṇini inherited from predecessors a varied tradition of linguistic work. He accepted some of what he received but differed from his antecedents when his own system required him to operate differently. One eminent predecessor known to Pāṇini was Śākalya the author of a padapāṭha to the Ṛgveda, who subjected the saṁhitā text to analysis and posited a pada text from which the former could be derived — directly or indirectly (see §4) — by means of rules, as was done in Śaunaka's Ṛgvedaprātiśākhya. Pāṇini adopted a similar procedure, but his derivational procedure aims to account for a language instead of a single text. In this system, utterances are derived from the point of view of a speaker, who, when he wishes to express a meaning, selects words appropriate to this expression, with respect to the significands brought to mind through his intention.[55]

The Pāṇinian derivation of an utterance starts with meanings, which serve as conditions for introducing affixes after verbal and nominal

52. A 7.3.111: घेर्ङिति (गुणः 108).
53. A 6.1.78: एचोऽयवायावः (अचि 77).

54.Scharf 2011 also argues against Houben's thesis.
55. योग्यं हि शब्दं प्रयोक्ता विवक्षाप्रापितसन्निधानेष्वभिधेयेषु प्रत्यर्थमुपादत्ते । (VPVṛ. 1.13 [44.4-5]). Cf. आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ (PŚ 3). Recall that *vivakṣā* refers to the intent of a community, how a community of speakers expresses itself; see §7 with note 42.

bases, as do cooccurrence conditions. Once an initial string has been formed in this manner, there is a continuum of operations, some of which may later refer back once more to semantics. The result is an utterance consisting of related padas. Pāṇinīyas conceive of the division of an utterance into constituent padas — themselves divided into bases and affixes — merely as a descriptive means, necessary to account for all possible utterances in a concise manner.[56]

The language that is the object of this description is a standard spoken by a group of ideal speakers referred to as *śiṣṭa*. Pāṇinīyas recognize that this speech, in which acceptable speech form are used, contrasts with what is considered unacceptable speech, vernacular usage with Middle Indic features. Pāṇini's śabdānuśāsana is considered to account for accepted usage segregated from this unaccepted usage. Within the accepted language, however, dialectal differences are recognized, which Pāṇini accounts for in the Aṣṭādhyāyī. He also accounts for usages particular to Vedic. All such usages are described by means of the same Pāṇinian derivational system.[57]

56. तत्र प्रतिवाक्यं सङ्केतग्रहासम्भवात्तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः । (LM5-6). Nāgeśa here encapsulates thinking that preceded him by many centuries. For example, Bhartṛhari speaks of two sorts of meanings: those that are abstracted and those that have a fixed nature; and two types of speech units: those that are to be explained and those that served to explain them. Sentential meanings have a fixed nature and from them one abstracts partial meanings attributed to putative constituents; these constituents serve to explain sentences, which are essentially indivisible: अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः । अन्वाख्येयाश्च ये शब्दाः ये चापि प्रति-पादकाः ॥ (VP 1.24).

57. A revised version of the arguments given in section **7** appears in section **4** of 'Derivation and interpretation in Pāṇini's system', in *Sanskrit Syntax*, *Selected papers presented at the seminar on Sanskrit syntax and discourse structures*, *13-15 June*, *Université Paris Diderot*, *with a bibliography of recent research by Hans Henrich Hock*, edited by Peter M. Scharf, in press.

## References and abbreviations

A — Aṣṭādhyāyī

Bh. — Mahābhāṣya. See Vedavrata.

Bhandari, Madhava Shastri et al.

1925 म०म० श्रीनागेशभट्टविरचिता वैयाकरणसिद्धान्तलघुमञ्जूषा श्रीमद्दुर्बलाचार्यविरचित“कुञ्जिका” — श्रीमद्बालम्भट्टविरचित“कला”टीकाद्वयेन संवलिता ... *Vaiyākaraṇa Siddhānta Laghumañjūshā by M.M Srī Nagesha Bhatta with two Commentaries called 'Kunjika' of Shri Durbalacharya and 'Kala' of Balam Bhatta*. ... Two volumes continuously paginated. Chowkhamba Sanskrit Series 44. Benares: Chowkhamba. Reprinted 1989.

Cardona, George

1976a *Pāṇini, a Survey of Research*. The Hague-Paris: Mouton. [corrected Indian reprint, Delhi: Motilal Banarsidass 1980, 1997.]

1976b Some features of Pāṇinian derivations, in *History of linguistic thought and contemporary linguistics*, edited by Herman Parret, Berlin: de Gruyter, pp. 137-158.

1991 On Pāṇini, Śākalya, Vedic dialects and Vedic exegetical traditions, in *Pāṇinian Studies*: *Professor S. D. Joshi Felicitation Volume*, edited by Madhav M. Deshpande and Saroja Bhate, Ann Arbor: Center for South and Southeast Asian Studies, University of Michigan, Number 37, p. 123-134.

1996 Āmreḍita compounds?, in *Veda-Vyākaraṇa-Vyākhyāna*, *Festschrift Paul Thieme* ... (= *Studien zur Indologie und Iranistik* 20), pp. 67-72.

1997a *Pāṇini*, *his Work and its Traditions*, *Volume I*: *Background and Introduction*, second edition. Delhi: Motilal Banarsidass.

1997b Vedic tradition and descriptions of grammarians, in *Inside the Texts and Beyond the Texts*: *New Approaches to the Study of the Vedas*, *Proceedings of the International Vedic Workshop, Harvard University, June 1989*, edited by Michael Witzel, Cambridge, MA: Department of Sanskrit and Indian Studies, Harvard University, pp. 33-38.

2009 On the structure of Pāṇini's system, in Huet, Kulkarni and Scharf 2009: 1-32.

2011 आम्रेडितं समस्तं व्यस्तं वा, in *A volume in felicitation of Professor Vachaspati Upadhyaya*, Delhi: D. K. Printworld, pp. 439-440.

2012 Pāṇini and padakāras, in *Devadattīyam*: *Johannes Bronkhorst Felicitation Volume* edited by François Voegeli, Vincent Eltschinger, Danielle Feller, Maria Piera Candotta, Bogdan Diaconescu and Malhar Kulkarni, Bern et alibi: Peter Lang, pp. 39-61.

2013 Combinations of upasargas and tiṅanta forms: lexical versus grammatical positions, in *Vyākaraṇa Across the Ages*, Proceedings of the Vyākaraṇa Section of the 15th World Sanskrit Conference, edited by George Cardona, Delhi: D.K. Printworld, pp. 189-215.

Ghosh, Manomohan

1938 *Pāṇinīya Śikṣā or the Śikṣā Vedāṅga Ascribed to Pāṇini* (*being the most ancient work on Indo-Aryan phonetics*), *critically edited in all its five recensions with an introduction*, *translation and notes together with its two commentaries*. Calcutta: University of Calcutta. Reprinted 1986, Delhi: Asian Humanities Press. [reference to the reconstituted text.]

Houben, Jan E. M.

1999 'Meaning statements' in Pāṇini's grammar: on the purpose and context of the Aṣṭādhyāyī. *Studien zur Indologie und Iranistik* 22: 23-54.

2003 Three myths in modern Pāṇinian studies. *Asiatische Studien/Études Asiatiques* 57: 121-174.

2009a Bhartṛhari as a 'cognitive linguist', in *Bhartṛhari*: *Language*, *Thought and Reality* (*Proceedings of the International Seminar*, *Delhi*, *December 12-14*, *2003*) edited by Mithilesh Chaturvedi, Delhi: Motilal Banarsidass, pp. 523-542.

2009b Pāṇini's grammar and its computerization: a construction grammar, in Kulkarni and Huet 2009: 6-25.

2012 Studies in India's Vedic grammarians, 1: Nārāyaṇa Bhaṭṭa's *Prakriyā-sarvasva* and Pāṇini's *Śe*, in *Studies in Sanskrit Grammars*, *Proceedings of Vyākaraṇa Section of the 14th World Sanskrit Conference* edited by George Cardona, Ashok Aklujkar and Hideyo Ogawa, Delhi: D.K. Printworld, pp. 163-194.

Huet, Gérard, Amba Kulkarni and Peter Scharf (eds.)
2009 *Sanskrit Computational Linguistics*, *First and Second International Symposia*, *Roquefort*, *France*, *October 2007*, *Providence*, *RI*, *USA*, *May 2008*, *Revised Selected and Invited papers*. Berlin-Heidelberg: Springer.

Kulkarni, Amba and Gérard Huet (eds.)
2009 *Sanskrit Computational Linguistics, Third International Symposium, Hyderabad, India, January 15-17, 2009*, *Proceedings*. Berlin-Heidelberg: Springer.

LM Vaiyākaraṇasiddhāntalaghumañjūṣā. See Bhandari, Madhava Shastri et al.

Mangal Deva Shastri
1931 *The Ṛgveda-Prātiśākhya with the Commentary of Uvaṭa edited from original manuscripts*, *with introduction, critical and additional notes, English translation of the text, and several appendices. Volume II*: *Text in Sūtra-Form and Commentary with Critical Apparatus.* उवटकृतभाष्यसहितं श्रीशौनकीयम् ऋग्वेदप्रातिशाख्यम् … Allahabad: The India Press, Limited.

Nir. Nirukta. See Sarup, Lakshman.

Pr. Pradīpa. See Vedavrata.

PŚ Pāṇinīyaśikṣā. See Ghosh, Manomohan.

Rau, Wilhelm
1977 *Bhartṛharis Vākyapadīya, Die Mūlakārikās nach den Handschriften herausgegeben und mit einem Pāda-Index versehen.* Abhandlungen für die Kunde des Morgenlandes Band XLII, 4. Wiesbaden: Steiner.

ṚPr. Ṛgvedaprātiśākhya. See Mangal Deva Shastri.

ṚV Ṛgveda. See Sontakke, N. S. et al.

ṚVpp. Ṛgvedapadapāṭha. See Sontakke, N. S. et al.

Sarup, Lakshman
1927 *The Nighaṇṭu and the Nirukta, the oldest Indian Treatise on Etymology, Philology and Semantics*, *Critically edited* ... निघण्टु-समन्वितं निरुक्तम् [शब्दव्युत्पत्ति-भाषाविज्ञानार्थविज्ञान-विषयको भारतीयः प्राचीनतमः प्रबन्धः] Lahore: University of the Panjab. Reprinted 1967, Delhi: Motilal Banarsidass.

Scharf, Peter M.
2009 Levels in Pāṇini's Aṣṭādhyāyī, in Kulkarni and Huet 2009: 66-77.

2011 On the semantic foundation of Pāṇinian derivational procedure: the derivation of *kumbhakāra*. *Journal of the American Oriental Society* 131: 39-72.

Sontakke, N. S. et al.

1933-51 ऋग्वेदसंहिता श्रीमत्सायणाचार्यविरचितभाष्यसहिता *Ṛgveda-Saṁhitā with the Commentary of Sāyaṇācārya*. Five volumes. Poona: Vaidic Samshodhan Mandal.

Subramania Iyer, K. A.

1966 *Vākyapadīya of Bhartṛhari with the Vṛtti and the Paddhati of Vṛṣabhadeva Kāṇḍa I Critically Edited* .... Deccan College Monograph Series 32. Poona: Deccan College.

Varma, Virendra Kumar

1975 भाष्यद्वयसहितम् शुक्लयजुर्वेद-प्रातिशाख्यम् अथवा वाजसनेयि-प्रातिशाख्यम्. Varanasi: Jñānaprakāśa Pratiṣṭhāna.

Vedavrata

1962-63 श्रीभगवत्पतञ्जलिविरचितं व्याकरण-महाभाष्यम् [श्रीकैय्यटकृतप्रदीपेन नागोजीभट्ट-कृतेन भाष्यप्रदीपोद्द्योतेन च विभूषितम् ]. Five volumes. Gurukul Jhajjar (Rohtak): Harayāṇā-Sāhitya-Saṁsthānam.

VP: Vākyapadīya. See Rau, Wilhelm.

VPr. Vājasaneyiprātiśākhya. See Varma, Virendra Kumar.

VPVṛ.: Vākyapdīyavṛtti. See Subramania Iyer, K. A.

vt. vārttika

# भट्टप्रभाकरयोर्मतभेदः

**अरुणकिरणजालैरञ्चिताशावकाशा विधृतजपवटीका**
**पुस्तकाभीतिहस्ता।**
**इतरकरवराब्जा फुल्लपङ्केरुहास्या निवसतु हृदि बाला**
**नित्यकल्याणशीला॥**
**वीणावादननिपुणा वेणीभरमधुकरश्रेणी।**
**एणीशावकनयना वाणी मे नटतु झटिति मुखमञ्चे॥**

दर्शनेषु मीमांसाया मुख्यं स्थानम्। 'पदवाक्यप्रमाणपरावारपारीण इत्युपाधिश्चिरन्तनानां' मल्लिनाथप्रभृतीनामासीत्। तत्र **'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्'** इति न्यायस्य व्याकरणस्य च सर्वशास्त्रोपकारकत्वं यथोच्यते तथा **'मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता'** इति भट्टपादोप्यस्य वाक्यशास्त्रत्वेन विद्यान्तराश्रितत्वं साधयति। वाक्यं गद्यमयं वा भवतु पद्यमयं वा तस्य समग्रस्य तात्पर्यनिर्णयाय प्रवृत्तमिदम्। विशेषतो वेदवाक्यार्थनिर्णयाय प्रवृत्तेप्यस्मिन् शास्त्रे तद्गतन्यायानुलिख्य सर्वेऽपि दार्शनिकाः शास्त्रकाराश्च स्वस्वप्रतिपाद्यं वस्तु पोषयन्तीति। तत्र शास्त्राध्ययनशीलानां न प्राधान्यम्। तत्रापि विरुद्धवदवभासमानानां भारतवर्षीयसंस्कृतिप्रतिपादकानां स्मृतीनां निबन्धकाराश्चिरन्तनाः मीमांसाप्रतिपादितैरेव न्यायैर्विरोधं परिहृत्य समन्वयं कुर्वन्तीति वयं पश्यामः। साधारणतया यत्र विरोधः प्रसरति तत्र लोका मिथो निन्दाव्यापारेऽवतरन्ति। मीमांसकास्तु न तथा, किन्तु समन्वयदृष्टिमाश्रित्य न्यायान् उपस्थापयन्ति। न्यायानां पुरो नतमस्तकैरस्माभिर्यतनीयमिति चिरन्तनः पन्थाः। ते च न्यायाः ईषन्न्यूनसहस्राधिकरणैः महर्षिजैमिनिना प्रतिपादिताः। अधिकरणशब्दस्तु न्यायालयवाची। न्यायाधीशेन यो न्यायो युक्तिभिः प्रमाणैश्च निर्णीयते तस्योल्लङ्घनं नाम महते दोषायेति पन्थाः सर्वैरेव दार्शनिकैः समाश्रितः। स्वस्वदर्शने शास्त्रे वा यत्र विरोध आपतति तत्र मीमांसान्यायेनैव विरोधः परिह्रियते। अत एव बहुविद्यान्तराश्रितत्वमस्येति विश्वसिमः।

जैमिनिमहर्षिणा सूत्ररूपेण प्रवर्तितेयं मीमांसा जैमिनेः प्रागपि सम्प्रदायतः प्रवृत्तासीदिति मे मतिः। सम्प्रदायो नाम गुरुशिष्यपारम्पर्येण विद्याप्राप्तिरिति न्यायवार्तिककाराः। परम्परासमायातेयं जैमिनिना सूत्रात्मना ग्रथिता। एवं ग्रथनस्य मूलं 'स्वाध्यायोऽध्येतव्यः' इति वेदवाक्यमेव। द्वादशलक्षणीयं मीमांसा। लक्षणशब्दोऽध्यायवाची। तृतीयं षष्ठं दशमञ्चाध्यायं विहायान्येष्वध्यायेषु चत्वारः पादाः, निर्दिष्टेषु त्रिष्वध्यायेषु प्रत्येकमष्टौ पादाः। आहत्य षष्टिपादात्मिका द्वादशलक्षणी। एकैकस्मिन् पादे बहून्यधिकरणानि। इमानि ईषन्नयूनसहस्रसंख्याकानीति प्रागवोचम्। एकैकसिमन्नप्यधिकरणेऽनेकानि सूत्राणि। इयं स्थितिः द्वादशलक्षण्याः। एषां सूत्राणां बोधायनेन उपवर्षेण च वृत्तिः विरचितेति केवलं श्रृणुमः। अनुपलम्भ दोषदूषिते इमे वृत्ती। शबरस्वामिनः काले वृत्ती इमे आस्तामिति प्रतीयते। तत्रोपवर्षवृत्तिमवलोक्य शबरस्वामिना भाष्यं विरचितम्। शबरस्वामिनः कालपर्यन्तमेकेनैव पथागच्छन्तीयमासीत्। तुतातिभट्टापरनामधेयेन कुमारिलभट्टेन भाष्यस्य व्याख्यानं प्रथमपादस्य श्लोकवार्तिकनाम्ना पद्यात्मना, तदुपरितनभागस्य तन्त्रवार्तिकटुप्टीकेति नाम्ना च व्यरचि। तत्र गुरुपरम्परागतमिदं पद्यम् :—

**'उम्बेकः कारिकां वेत्ति चम्पूं वेत्ति प्रभाकरः।**
**मण्डनस्तूभयं वेत्ति नोभयं वेत्ति रेवणः॥' इति।**

अनेन पद्येन चत्वारः शिष्या भट्टपादस्य, तत्र प्रभाकरः बृहतीनाम्नीं टीकां शाबरभाष्यस्य समग्रस्य विरचितवान्। इयमपि काचन जनश्रुतिः—यदध्ययनावसरे प्रभाकरः 'अत्र तु नोक्तम्, तत्रापि नोक्तम्' इति पङ्क्तिमध्यापयन्तं भट्टपादं पङ्क्तेरर्थानवबोधेन चिन्तयन्तं 'अत्र तुनोक्तम्, तत्र अपिनोक्तमि'ति विशदीकृत्य बोधितवान्। बुद्धिमन्तं प्रभाकरं 'इत आरभ्य त्वं गुरुरसि' इति भट्टपादेनाभ्यधायि। ततः परं गुरुमात्मानं मन्यमानः प्रभाकरः स्वबुद्धिकौशलेन भट्टपादसिद्धान्तविपरीतमेव भाष्यं व्याचख्यौ। ततः परं नाम्ना मुरारिः प्रामाण्यवादविषये भट्टप्रभाकरविपरीतमेव कञ्चन मार्गमाविरकार्षीत्। अत एवैकेन मार्गेण गच्छन्तीयं मीमांसा त्रिपथगा जातेति। तत्र मीमांसायामधिकरणप्रस्थानम् प्रमाणप्रमेयप्रस्थानम् इति द्वे प्रस्थाने विद्येते। अधिकरणप्रस्थाने प्रत्यधिकरणं प्रभाकरः संशयपूर्वोत्तरपक्षान् विपरीतानेव प्रदर्शयति। विषयवाक्यन्तु सूत्रेणैवोन्नेतव्यं भवति। शबरस्वामी भाष्यकारः स्वयमुन्नीय दर्शयति क्वचित् क्वचिच्च 'उपवर्षमुखेन विषयवाक्यं जानन् अधिकरणमारचयति इत्यस्यां स्थितौ प्रथममधिकरणं मतद्वयेन विचारयामः। उभयोरपि मतयोः **'स्वाध्यायोऽध्येतव्यः'** इति विषयवाक्यं समानम्। संशयोऽपि 'शास्त्रमारम्भणीयम्

न वेति समानः। सिद्धान्तोऽपि समान एव। पूर्वपक्षे परं युक्तौ वैपरीत्यं पश्यामः। भट्टमते स्वाध्यायाध्ययनविधौ फलबोधकपदाभावेन तत्र विश्वजिन्न्यायेन स्वर्गः फलं कल्पनीयम्, स्वर्गाय स्वाध्यायाध्ययनं कर्तव्यमित्यायाति। अर्थज्ञानस्य तत्र फलत्वाभावात् तदर्थं विचारस्य न प्रसक्तिः, अतो विचारात्मकमीमांसाशास्त्रं नारब्धव्यमिति पूर्वःपक्षः।

प्रभाकरमते– साधिकारस्यैव विधिवाक्यस्य प्रवर्तकत्वम्। अधिकारः फलम्। स्वाध्यायाध्ययनविधौ फलबोधकपदाभावेन तस्य प्रवर्तकत्वमेव नास्ति। अतस्तस्य परविधिप्रयुक्तत्वमङ्गीकर्तव्यम्। परश्च विधिः 'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत' इति। अथवा उपनीयाध्ययनेनाचार्यकं भावयेत्' इति कल्पितविधिः। अत्र माणवककर्तृकाध्ययनेन विना आचार्यकत्वसिद्धिर्नभवेदित्यनेनाध्ययनमाक्षिप्यते। तदिदमध्ययनं 'स्वाध्यायोऽध्येतव्यः' इति विधिरनुवदति। एवमङ्गीकृत्य विचार्यते – आचार्यकरणविधिप्रयुक्ताध्ययनस्य माणवककर्तृकस्य आचार्यकत्वसिद्धिः फलं किं वा अर्थज्ञानमिति। आचार्यकत्वसिद्धिरेव फलम्। ततश्चार्थज्ञानस्य प्रसक्त्यभावेन तन्निर्णयाय विचारशास्त्रं नारब्धव्यमिति पूर्वपक्षः। एवं प्रत्यधिकरणं क्वचित्पूर्वपक्षे क्वचिच्च सिद्धान्ते वैपरीत्यं प्रभाकरप्रवर्तितेष्वधिकरणेषु दृश्यते। भवदेवविरचिते तौतातितमततिलके मङ्गलदेवशास्त्रिणां निर्देशेन मया सम्पादिते ग्रन्थे तृतीयाध्यायपर्यन्तं प्रत्यधिकरणं प्रभाकरसम्मताधिकरणस्वरूपं निर्दिष्टमस्ति। अयं ग्रन्थस्तन्त्रवार्तिकस्य व्याख्यारूपः। एवमधिकरणप्रस्थानं मतभेदेन प्रचलति।

यद्यपीदं शास्त्रं वेदवाक्यार्थनिर्णयायैव प्रवृत्तम्, तथापि स्वशास्त्रसिद्धान्तानुसारेण प्रमाणानां तत्प्रमेयाणाञ्च निरूपणमावश्यकम्। सर्वस्यापि दर्शनस्य स्वस्वानुकूला मसृणा काचन सरणिर्भवति। तस्यां सरणौ ये कण्टकान् प्रक्षिपन्ति तान् दूरीकृत्य सर्वोऽपि दार्शनिकः प्रयाति। तत्र मीमांसायाः सरणौ कण्टकप्रक्षेप्तारो वेदबाह्या एव भवन्ति। तदर्थं प्रमाणानां प्रमेयाणाञ्च निरूपणं भाट्टैरप्यवलम्बितं प्राभाकरैरपि। तदिहं प्रमाणप्रमेयजातं क्वचित्सूत्रारूढं क्वचिच्च भाष्यतद्वार्तिकारूढम्। प्रमाणानां तत्प्रमेयाणां वैकत्र ग्रन्थे सङ्कलनं नासीत्। अस्मत्प्रार्थनया गुरुचरणाः पूज्यपादाः म.म. श्रीचिन्नस्वामिशास्त्रिणः तन्त्रसिद्धान्तरत्नावलिग्रन्थं तादृशं प्राणैषुः। अतिसङ्ग्रहेणायं ग्रन्थो मन्मनस्तोषाय नासीदित्यस्य विस्तराय चिन्तयन्नासम्। किन्तु भगवतः कृपया कमलाकरभट्टविरचितं मीमांसाकुतुहलाभिधं ग्रन्थमवाप्य प्रसन्नोऽभवम्। ग्रन्थोऽयं भट्टमतावलम्बी, शब्दनिरूपणान्तमेवोपलभ्यते। तत्राप्येकैव मातृका। तामेव मातृकामादाय सम्प्रति कार्यमारब्धवानस्मि। अस्मिन् ग्रन्थे प्रकाशिते मन्ये मन्मनोरथः पूर्तिमेष्यतीति। यथा न्याये सिद्धान्तमुक्तावली तथा मीमांसायाः अयं ग्रन्थः। नैयायिकाभिमतं समवायं विशेषञ्च पदार्थं युक्तिभिः खण्डयन्

कमलाकरभट्टः स्वीयं वैदुष्यं प्रकटयति। एवमतिरिक्तपदार्थतया शक्तिं साधयन् अनितरसाधारणं पाण्डित्यमाविष्करोति। (षण्मासाभ्यन्तर एव विदुषामध्ययनाय ग्रन्थोऽयं प्रकाशमेष्यतीति विश्वसिमि।)

भाट्टमते **द्र[१]व्यं गु[२]णःक[३]र्म सा[४]मान्यं शक्तिश्चेति पञ्च भावाः अभा[६]वश्चेति षडेव पदार्थाः**।

प्रभाकरमते–अभावाख्यः पदार्थो नास्ति, तस्याधिकरणात्मकत्वात्। ततश्च द्र[1]व्यं गु[2]णः क[3]र्म सा[4]मान्यं शक्[5]तिः सा[6]दृश्यं संख[7]या समवा[8]यश्चेत्यष्टौ पदार्थाः।

मतद्वयेऽपि शक्तेरतिरिक्तत्वस्वीकारेण मीमांसका निरीश्वरवादिन इति प्रवादस्य नावसरः। 'सामर्थ्यं सर्वभावानां शक्तिरित्यभिधीयते' इति भट्टपादैः 'सर्वभावानाम्' इति भावपदं प्रयुक्तम्। तेनेदं निर्गलितं भवति–यत् किमिदं जगत्? कस्मादिदं प्रावर्तिष्ट इत्यादीनां प्रश्नानामुत्तरं लब्धं भवति। जगत्स्रष्टृत्वेन नैयायिकैरनुमीयमान ईश्वरः शक्तिरूप एव, तन्मते तस्य करचरणाद्यवयवास्वीकारात्। सर्वतन्त्रस्वतन्त्रा उदयनाचार्या अपि–

**सापेक्षत्वादनादित्वात् वैचित्र्याद्विश्ववृत्तितः।**
**प्रत्यात्मनियमात् भुक्तेरस्ति हेतुरलौकिकः॥ 1/4, न्या.कु.**

इति कारिकया धर्माधर्मात्मकालौकिकपरलोकाऽस्तित्वे विप्रतिपन्नं प्रति तत्साधकहेतून् निर्दिशन्तोऽपि तत्रासन्तुष्टा अन्ते पद्यद्वयेनोऽपसंहरन्ति–

**अस्माकं तु निसर्ग-सुन्दर! चिराच्चेतो निमग्नं त्वयी-**
**त्यद्धाऽऽनन्द-निधौ तथाऽपि तरलं नाद्यापि सन्तृप्यते।**
**तन्नाथ! त्वरितं विधेहि करुणां येन त्वेदकाग्रतां**
**याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः॥**
**5/19, न्या.कु.**

**इत्येवं श्रुति-नीति-सम्प्लव-जलैर्भूयोभिराक्षालिते**
**येषां नास्पदमादधासि हृदये ते शैल-साराऽऽशयाः।**
**किन्तु प्रस्तुत-विप्रतीप-विधयोऽप्युच्चैर्भवच्चिन्तकाः**
**काले कारुणिक! त्वयैव कृपया ते तारणीया नराः॥**
**5/18, न्या.कु.**

इति। अमी च हेतवश्शक्तिसाधका अपि भवितुमर्हन्ति।

तिसृभिर्दृष्टिभिरीश्वरस्साध्यते। तत्रैका दृष्टिः जगत्कर्तृत्वसिद्धिरूपा, द्वितीया प्राणिनां तत्तत्कर्मानुसारेण फलदातृत्वसिद्धिरूपा, अथवा धर्माधर्मरूपा –दृष्टसाधकसिद्धिरूपा, तृतीया च सृष्ट्यादौ कल्पान्तरगतपरम्पराप्राप्त-वेदानामुपदेष्टृत्वसिद्धिरूपा।। तत्र प्रथमा दृष्टिर्मीमांसकानां नास्ति, जगतो

नित्यत्वस्वीकारात्। द्वितीया तृतीया च दृष्टी मीमांसकानामपि स्तः – तत्तत्कर्मगतशक्त्यैवादृष्टजननद्वारा प्राणिनां फलोपभोगः तत्तत्खण्डसृष्ट्यादौ उपदेष्टुरीश्वराङ्गीकारे बाधकाभावात्, 'यः कल्पस्स कल्पपूर्वः' इति न्यायात्। तदिदं सर्वं मनसि निधाय भट्टपादा आहुः–

**"शक्तिः कार्यानुमेयत्वाद् यद्गतैवोपयुज्यते।**
**तद्गतैवाभ्युपेतव्या स्वाश्रयान्याश्रयापि वा॥"**

**"यद्गतैवोपयुज्यते"** इति कथनेन द्रव्यगुणकर्मसामान्यातिरिक्तत्वमस्याः शक्तेः सिध्यति।

किञ्च–

**"आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्।**
**कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते॥"**
**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।**
**नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया॥**
**तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते॥"**

इत्यादि वार्तिकसन्दर्भविमर्शनेन कर्मगतशक्त्यैव मोक्षोऽपि जीवस्य सिध्यति। गृहे मत्कुणास्सन्तीति न हि कश्चित्प्रेक्षावान् गृहमेव दहेत्। जीवानां मुक्तिरावश्यकीति हेतोः प्रपञ्चस्यैवापलापो न युक्तः। प्रपञ्चेन सह यस्सम्बन्धस्तस्य विलयो यदि कर्मभिस्साध्यः तर्हि प्रपञ्चस्यैवापलापः किमित्येष्टव्य इति भट्टपादानामाशयः। मीमांसकाः दुःखाभाव एव मोक्ष इत्यभिप्रयन्ति नवीनास्तु सुखाभिव्यक्तिं मन्यन्ते कमलाकरभट्टादयः। मीमांसाकुतूहलभूमिकायां विस्तरेणायं विषय उपपादितः।*

---

* एवं–

**'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।**
**नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया'॥ इति वार्तिकम्,**
**वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां**
**तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्**

इति भगवत्पादानामुपदेशः,

**'कर्माण्यपि जैमिनिः फलार्थत्वात्' 'फलञ्च पुरुषार्थत्वात्' 'पुरुषश्च कर्मार्थत्वात्'** इति जैमिनिसूत्राणि च सुविभाव्य कमलाकरभट्टो मोक्षस्य ज्ञानकर्मसमुच्चयमार्गः श्रेयानिति निश्चित्य तत्र पक्षद्वयसाधकान्युपनिषदादिवाक्यानि परिगणय्य ज्ञानकर्मसमुच्चयवादे स्वस्याभिनिवेशं प्रकटयति। भट्टपादानामप्यत्रैव तात्पर्यमिति प्रमाणानि च दर्शयति। युक्तमिदम्–शास्त्रस्य मूलप्रवर्तकस्य महर्षिजैमिनेः कर्मणां फलार्थत्वम् फलानां पुरुषार्थत्वम् पुरुषाणाञ्च कर्मार्थत्वमिति

सूत्रयतो नायमभिप्रायस्स्यात् यन्मानवास्संसारचक्रे परिभ्रममाणा एव तिष्ठन्त्विति, तथासति स्वीयदर्शनस्य दर्शनत्वं कथं सिध्येत्? परमात्मनो दर्शनावसानानि खलु दर्शनानि भवन्ति। तदर्थमेवं पन्था उद्घाटनीयः–ये च पुनः पुनर्जनित्वा आहाराय जीवनं मन्यमाना नैकविधानि फलान्युपभोक्तुमीहन्ते ते काम्यानि निषिद्धानि च कर्माण्याचरन्तः फलोपभोगं कुर्वन्तु, ये च जीवनायाहारं मन्यमानाः फलोपभोगविमुखास्ते नित्यनैमित्तिकान्येवाचरन्तु। काम्या विधयः पुरुषान् बलान्न प्रवर्तयन्ति किन्तु यो यत्कामयते तस्योपायं प्रदर्शयन्ति। यः पशून् पुत्रान् जनपदं राज्यं वा प्राप्तुमिच्छेत् तस्यायमभ्युपाय इत्येवं बोधनं काम्यविधीनां 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः' इत्यादीनां कार्यम्। कर्तव्यत्वप्रकारकबोधजननसामर्थ्यवन्त्यपीमानि वाक्यानि तत्तत्फलाभिलाषिभ्य उपायमात्रमवबोधयन्ति, न त्ववश्यकर्तव्यतां बोधयन्ति। 'यावज्जीवमग्निहोत्रं जुहुयात्' 'वसन्ते वसन्ते ज्योतिषा यजेत'इत्यादिवाक्यानि तु नित्यानामकरणे प्रत्यवायो भवेदिति तत्परिहारायावश्यकर्तव्यतां बोधयन्ति। एवं श्रौतस्मार्तकर्मणां स्वरूपे ज्ञाते शरीराम्भकं कर्म किमिति ज्ञातं भवति। काम्यं निषिद्धञ्च कर्म शरीरारम्भकम्। तस्य तस्य फलस्योपभोगाय शरीरन्तावदावश्यकम्। उपभोगार्हाणि फलान्यैहिकान्यपि भवन्त्यामुष्मिकाण्यपि। तत्तदनुसारेण कृतानि कर्माणि शरीराणि समुत्पादयन्ति। जन्मजन्मान्तरार्जितपुण्यपापविषय एव विवादः–किं तेषां ज्ञानेनैव नाश्यत्वम् उत नित्यनैमित्तिककर्मनाश्यत्वमपीति। यथा 'ज्ञानाग्निः सर्वकर्माणि' इत्यादिप्रमाणैर्ज्ञाननाश्यत्वं, तथा 'प्रायश्चित्तेन नश्यन्ति पापानि सुमहान्त्यपि' इत्यादिप्रमाणैः प्रायश्चित्तरूपेण क्रियमाणैः कर्मभिस्तन्नाशाभ्युपगमे न शास्त्रविरोधः। इदमभिप्रेत्यैव भट्पादैरुक्तम्–

**'नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया'** इति।

वर्णाश्रमधर्मपरिपालनं ज्ञानमार्गावलम्बिनां कर्ममार्गावलम्बिनाञ्च तुल्यमेव। ये चाधिगतस्वस्वरूपास्सिद्धाः ते शरीरमिदं नष्टमिति वा न नष्टमिति वा न विदन्ति, यतस्ते स्वस्वरूपमध्यगमन्। तेषां कृते प्रत्यवायसंस्पर्श एव दूरापेतः। ये च संसारिणो वर्णाश्रम -धर्मपरिपालनरतास्तेषामुद्धारायापि मार्गः परिकल्पनीयः इति 'पुरुषश्च कर्मार्थत्वात्' इति जैमिनिसूत्रमवलम्ब्य भट्टपादा कर्ममार्गं प्रदर्शितवन्तः। भट्टपादाननुसरन् कमलाकरभट्टो ज्ञानकर्मसमुच्चयवादं विस्तरेण प्रतिपादितवान् स्वीये कुतूहले।

कर्ममार्गे दृढतराभिनिवेशयुक्तोऽपि कमलाकरभट्टः सगुणोपासनायां श्रद्धातिशयं प्रकटयति। नित्यनैमित्तिककर्माचरणशीला अपि विपश्चितः माध्याह्निकानुष्ठानानन्तरं शिवपूजनं पञ्चायतनपूजनं श्रीचक्रसम्पूजनं वा स्वस्वसम्प्रदायानुसारेण विदध्युरिति स्वीयमाशयमाविष्करोति 'तेनेशस्य विधीयतामपचितिः' इति भगवत्पादानामुपदेशवाक्ये तच्छब्दः कर्म परामृशति। नित्यनैमित्तिक कर्मानुष्ठानमेव भगवतोऽपचितिर्भवति, तत्र देवपूजनमपि नित्यं कर्म गृहस्थानां विहितमेव। इदञ्च पूजनं सगुणोपासनरूपमित्यङ्गीकारे न कोऽपि दोषः। अत एव ग्रन्थादावन्ते च लिखति–'एवं विदितपदार्थः नित्यानित्यवस्तुविवेकशमदमादिवैराग्यभक्तिसम्पन्नो नित्यकर्माचरन् 'यो वै भूमा तत्सुखम्' इत्यादिश्रुतिस्मृतिभ्यो मोक्षस्य पुरुषार्थत्वमाकलय्य योगाभ्यासेन दहरादि सगुणब्रह्मोपासनयाध्यक्षीकृतब्रह्मतत्त्वः परब्रह्मणि लीयते' इति।

मम तु प्रतिभाति–यद् बादरिः जैनिनिश्च 'अहं ज्ञानमार्गमवलम्ब्य गच्छामि, त्वं कर्ममार्गमवलम्ब्य गच्छेः' इति मिथस्संल्लप्य सूत्रप्रणयने प्रवृत्ताविति। सूत्रप्रणयनात्पूर्वमपि ज्ञानकर्मविषयिणी चर्चा महर्षीणां गोष्ठीष्वासीदेव। अत एवोभावपि स्वस्वग्रन्थे स्वनाम्ना सहान्येषामपि नामानि निर्दिशतः। वस्तु यथा तथा वा! उभयोरप्ययं 'समय' आसीदिति प्रतीयते–यत् एकस्य मार्गेऽपरेण हस्तक्षेपो न कर्तव्य इति। संहिताब्राह्मणवाक्यानि समादाय गच्छति जैमिनिः, उपनिषद्वाक्यानि समादाय गच्छति बादरिः। उभयेषामपि वाक्यानां वेदत्वं समानम्। अत्र विरोधस्य क्वावसरः? वेदवाक्यार्थर्णिय उभाभ्यामपि कर्तव्यः, प्रामाण्यञ्चोभयोस्तुल्यम्।

एवं कमलाकरभट्टो ज्ञानकर्मसमुच्चयो मोक्षसाधनमिति प्रतिपादयन् दुःखाभाव एव मोक्ष इति पक्षञ्च निराकुर्वन् मोक्षस्य सुखरूपत्वं साधयति। एवमत्राभ्यूहितुं शक्यते, यदतिचिरन्तने काले मीमांसाध्येतारस्त एवासन् ये च स्वकुलपरम्परागतशाखां सनियममधीत्य वेदवाक्यार्थाधिगमाय गुरुकुल एव त्रिचतुराणि वर्षाणि न्युष्य द्वादशलक्षणीं मीमांसामधिगत्य गुरोरनुज्ञानमवाप्य द्वितीयमाश्रमं प्रविविशुः। द्वितीयमाश्रमं यथावत्परिपालयन्तः कृतश्रौताधानाः स्मार्तानि श्रौतानि च कर्माण्याचरन्तोऽध्यापयन्तश्च शास्त्राणि, ते ग्रन्थप्रणेतारोऽप्यभवन्। श्रीमदप्पय्यदीक्षितेन्द्राः श्रीवेङ्कटेशमखिनः, श्रीराजचूडामणिदीक्षिताः, श्रीवासुदेवदीक्षिताः अन्ये च महानुभावाः परिगणयितुं शक्यन्ते। इमे याज्ञिकमीमांसका इति व्यवहर्तुं योग्याः। अन्ये च भवदेव–पार्थसारथि–भट्सोमेश्वर–भट्टसोमनाथ–वैद्यनाथग्रन्थकृतो दार्शनिकमीमांसका इति व्यवहारयोग्याः। इमे कर्मानुष्ठातारो नाभवन्निति न मेऽभिप्रायः। एतेषां ग्रन्थेषु तौतातितमततिलकशास्त्रदीपिकादिस्वधीयानेषु श्रौतप्रक्रियाविचारः श्रीमदप्पय्यदीक्षितश्रीवेङ्कटेश –मख्यादिभिर्यादृशः कृतस्तादृशो नानुभूयते। किञ्च ते महाक्रतूनामनुष्ठातार इत्यत्र प्रमाणमुपलभ्यते। भवदेवादिविषये तादृशं प्रमाणं नोपलभ्यते। अस्तु यथा तथा वा। याज्ञिकमीमांसका दार्शनिकमीमांसका इति द्वेधा विभागो मीमांसकसमाजे प्रचलति। अत एव ग्रन्थेषु तत्र तत्र 'याज्ञिकास्तु' इति मतभेदमुल्लिखन्ति ग्रन्थकृतः खण्डदेवप्रभृतयः।

एवं विभागप्रदर्शनस्येदं मम तात्पर्यम्—ये कर्मकाण्डिनो मीमांसकाश्च ते कर्मानुष्ठानावसरे कर्मणामारम्भे 'तेन परमेश्वरं प्रीणयानि' इति कर्मणामवसाने च 'नारायणायेति समर्पयामि' इति चोल्लिखन्ति। ये च केवलमीमांसका दार्शनिकास्तेषामेवमुल्लेखस्यावश्यकता न विद्यते, यतो हीमे शरीराम्भकत्वेन पुण्यं कर्म पापञ्च कर्मेत्यङ्गीकुर्वन्ति। तत्र कर्मजन्यमपूर्वमेव फलोपभोगाय शरीरारम्भकं भवति। तत्र परमेश्वरप्रीणनं वा नारायणाय समर्पणं वा कस्मै फलाय स्यात्।

एतेनेश्वरप्रद्वेषिणो दार्शनिकमीमांसका इत्यारोपयितुं प्रवृत्ताः केचन। आरोपमिमं दूरीकुर्वन् कमलाकर ईश्वरं प्रसाधयति कुतूहले। ज्ञानकर्मसमुच्चयपक्षं प्रसाध्य **'ननु निरीश्वरवादिनस्ते कोऽयं भक्तिमार्गप्रवेशः'?** इति पृष्ट्वा **'पतत्वयं प्रवादाशनिरेकदेशिषु'** (कु.वृ. 44) इत्यभिधाय वार्तिकमारभ्य सर्वेषां ग्रन्थकृतां मङ्गलपद्यानि प्रदर्शयन् ईश्वरस्यानुमानसाध्यत्वञ्च निराकुर्वन् शब्दगम्यत्वं संसाधयति। याज्ञिकमीमांसका भवन्तु दार्शनिकमीमांसका वा, उभयेऽपि सेश्वरमीमांसका एव। तत्र याज्ञिकमीमांसकाः सगुणं साकारमीश्वरम्, दार्शनिकमीमांसका निर्गुणं निराकारञ्च तं स्वीकुर्वन्तीति समन्वयो भवितुमर्हति। शरीराम्भकसामग्रीविघटनं

समवायं पदार्थान्तरत्वेन साधयन्तो नैयायिकाः नित्यत्वमेकत्वमिति प्राभाकराश्च तस्य नित्यत्वेऽप्यनेकत्वे न कापि हानिरिति अनेकत्वमिति ब्रुवते।

भाट्टास्तु–अयुतसिद्धयोः पदार्थयोस्सम्बन्धः स्वरूपविशेषे एव पर्यवस्यतीति पदार्थान्तरत्वं नाङ्गीकुर्वन्ति।

एवं भाट्टानां मते विशेषोऽपि न पदार्थान्तरम्। द्वयोर्विशेषयोः भेदसाधनाय तस्य स्वतो व्यावर्तकत्वमङ्गीकर्त्तव्यम्। तच्च विशेषरूपमेव तथा सत्यनवस्था स्यादिति भाट्टानामाशयः।

प्राभाकरा अभावं नाङ्गीकुर्वन्ति। तेषां मते घटाभावोऽधिकरणरूपः। अधिकरणं भूतलम्। तच्च घटवत्यपि देशे वर्तत एव। तर्हि घटो नास्तीति तत्र व्यवहार आपतेत्। अतो भाट्टा अभावं पदार्थान्तरं स्वीचक्रुः।

सादृश्यस्य संख्यायाश्च पदार्थान्तरत्वं स्वीकुर्वतां प्राभाकराणां मतं नैयायिका अपि निराकुर्वन्तीति भाट्टानां मते तयोः पदार्थान्तरत्वं नास्ति।

एतेषां प्रमेयाणामवगतये भाट्टमते षट् प्रमाणानि। प्राभाकरमते अनुपलब्धिं विहाय प्रत्यक्षादीनि पञ्चेति भेदः। तत्रार्थापत्तिप्रमाणे नैयायिका विवदन्ते। प्रमाणमिदमनुमानेऽन्तर्भावयन्ति ते। तदिदं भाट्टाः प्राभाकराश्च न सहन्ते। अत्रेदं तत्त्वम्–"यजेत स्वर्गकामः" इत्यादिविधिवाक्ये भाट्टमते लिङर्थः प्रवर्तना–शाब्दीभावना। तत्राख्यातार्थार्थीभावना प्रवृत्तिरूपा साध्यत्वेनान्वेति। तस्यामार्थीभावनायां धात्वर्थो यागहोमदानादिः करणत्वेनान्वेति। प्राभाकरमते विधिवाक्ये लिङादेः नियोगोऽर्थः। नियोगश्चादृष्टमपूर्वमित्यादिशब्दैर्व्यपदिश्यते। लिङादिघटितस्य एवाख्यातस्यार्थीभावनार्थः। लिङघटितस्थलेषु आख्यातसत्वेऽपि तस्य भावना नार्थः। यत्राख्यातस्य भावनार्थकत्वं तत्र धात्वर्थस्य यागादेर्विषयत्वेन करणत्वेन चान्वय इति स्थितिः। धात्वर्थयागादिनिष्ठकरणत्वञ्च स्वर्गादिफलनिरूपितम् भाट्टमते, प्राभाकरमते च नियोज्यनिरूपितम्। नियोज्यो नामाधिकारी फलाभिलाषीत्यर्थः। तत्रोभयोरपि मतयोः यागादिधात्वर्थनिष्ठं यत्करणत्वं कथमुपपन्नं भवतु यागादेः क्रियात्मकत्वेन क्षणिकत्वात्। यागादेः करणत्वञ्च वेदबोधितं न्यायसिद्धम्। क्षणिकस्यापि यागादेः वेदबोधिततत्वेन करणत्वकल्पनं

---

भगवद्भक्तिद्वारा भवत्विति प्रथमे, द्वितीये च काम्यनिषिद्धकर्माकरणपूर्वकं नित्यनैमित्तिकाचरणद्वारा भवत्विति निश्चित्य प्रवृत्ता इति समन्वयस्सुकरः। एतेन वेदानां पूर्वभागस्य, तेषामन्तिमभागस्य च प्रामाण्ये निस्सन्दिग्धत्वं साधितं भवति।

लोकविरुद्धम्। तदेव कल्पनीयं भवति यच्च न लोकविरुद्धम्। यागध्वंसस्यैव करणत्वं भवत्विति शङ्का च न समीचीना, तस्य नित्यत्वेन सर्वदा फलोपभोगापत्तेः। फलोपभोगनाशस्य प्रतिबन्धकत्वकल्पने चानन्तध्वंसानां प्रतिबन्धकत्वकल्पनं गौरवाय स्यादिति। वेदबोधितयागादिनिष्ठकरणत्वोपपत्तये अर्थापत्तिः प्रमाणमिष्यते। वेदबोधितकरणत्वान्यथाऽनुपपत्या अपूर्वं कल्प्यत इत्यर्थापत्तेः प्रमाणान्तरत्वस्वीकार इति। प्रमाणेनावगतस्यार्थस्यार्थान्तरेण विनानुपपन्नस्य तदुपपत्यर्थमर्थान्तरकल्पनं यत् तदर्थापत्तिप्रमाणं भवति। तदिदं श्रुतार्थापत्तिः दृष्टार्थापत्तिरिति द्विविधा भाट्टमते। प्रभाकरमते च श्रुतार्थापत्तिर्नास्ति, अपूर्वस्यैव विध्यर्थत्वस्वीकारात्।

तदिदं प्रमाणं नानुमानेऽन्तर्भावयितुं शक्यम्। नैयायिकाः व्यतिरेक्यनुमान एवार्थापत्तिमन्तर्भावयन्ति। तच्चानुमानं मीमांसकैर्नाङ्गीक्रियत इति प्रमाणान्तरत्वं सिध्यतीति भेदः। व्यतिरेकव्याप्त्यार्थापत्तेर्गतार्थता उतार्थापत्या व्यतिरेकव्याप्तेर्गतार्थता इति विनिगमनाभावात् अर्थापत्तिः प्रमाणान्तरमिति मीमांसकानामाशयः।

अभावाख्यपदार्थस्यैवाभावात् प्रभाकरमतेऽनुपलब्धेः प्रमाणान्तरत्वं नास्तीति प्रागुक्तम्। 'येनेन्द्रियेण या व्यक्तिर्गृह्यते तेनैवेन्द्रियेण तन्निष्ठाजातिः तदभावश्च गृह्यत इति वदन्तो नैयायिका अभावग्रह ऐन्द्रियक इति मन्यमाना अनुपलब्धिं नाङ्गीकुर्वन्ति।

किन्तु–

**'प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।**
**वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥'**

इति वार्तिकानुसारेण यथा घटपटादीनां वस्तूनामवबोधाय प्रमाणापेक्षा, तथाभावस्यापि वस्तुत्वात् तदवबोधाय प्रमाणमावश्यकम्। न तत्र प्रत्यक्षादीनि प्रमाणान्युपयुज्यन्ते। इन्द्रियाणामभावेऽपि अभावस्य गम्यमानत्वात्। अतोऽनुपलब्धेः प्रमाणान्तरत्वं मीमांसकेषु भाट्टानाम्।

द्रव्येषु भाट्टाः शब्दं तमश्चेति द्वेऽतिरिक्ते स्वीकुर्वन्ति। एकादश द्रव्याणि। दशमाध्याये शब्दायमानानां मन्त्राणां द्रव्यत्वं जैमिनिरेव निर्दिशति। शब्दश्च वर्णात्मको ध्वन्यात्मकश्च। तत्र वर्णात्मकाः शब्दा विभवः। वियति सर्वगतानां वर्णानां ध्वनिभिः कण्ठताल्वाद्यभिघातजन्यैरभिव्यक्तिर्भवति न तूत्पत्तिः। विद्युत्प्रेरितैः वायवीयकल्लोलैः सर्वत्र व्याप्ता वर्णा अभिव्यज्यन्त इति साम्प्रतं वयमनुभवामः। अभिव्यंजकध्वनीनां नाशेन वर्णा नश्यन्तीवेति वदामः।

तेजोऽभावस्तम इति नैयायिकाः। भाट्टास्तु तद् द्रव्यमित्याचक्षते। गुणवत्त्वं क्रियावत्त्वञ्च द्रव्यलक्षणं चेदङ्गीक्रियते तमसो द्रव्यत्वं सिध्यति।

प्राभाकरमते नैयायिकानामिव नवैव द्रव्याणि। द्रव्येषु वायु: त्वगिन्द्रियप्रत्यक्षा भाट्टमते। प्राभाकरास्तु वायुमनुमेयं मन्यन्ते।

आकाशकालदिशां प्रत्यक्षत्वं भाट्टानाम्, प्राभाकरणान्त्वनुमेयत्वम्। आत्मा मानसप्रत्यक्षविषयो भाट्टानाम्, प्राभाकरणान्तु अहंप्रत्ययगम्य:। मनस्तु भाट्टप्रभाकरयोरणु। भाट्टानां शब्दो द्रव्यम्, प्राभाकराणान्त्वाकाशगुण:। तमसो द्रव्यत्वं भाट्टानां, प्राभाकराणान्तु तन्नास्त्येव।

भाट्टानां मते एकविंशतिविधा गुणा:–रू[1]प रस[2]ग[3]न्धस्प[4]र्शसंख[5]या–परिमा[6]ण–सं[7]योग–विभा[8]ग,–परत्वापरत्वगुरुत्व–द्रवत्व–स्नेह–बुद्धि–सुख–दु:खेच्छाद्वेष–संस्कारध्वनिप्राकट्यभेदेन। प्राभाकरास्तु संख्यां पदार्थान्तरत्वेन परिगणयन्ति। भाट्टानां मते ज्ञानमनुमेयम्, प्राभाकरणान्तु स्वयं प्रकाशम्।

भाट्टानामन्यथाख्यातिवाद:, प्राभाकरणान्त्वख्यातिवाद:। कर्म प्रत्यक्षं भाट्टानाम्, प्राभाकराणान्त्वनुमेयम्।

परापररूपेण सामान्यं द्विविधं भाट्टानाम्, प्राभाकराणान्तु परसामान्यं नास्ति। ब्राह्मणत्वादिजातिरस्ति भाट्टानाम्, तन्नास्ति प्राभाकराणाम्।

अभावश्चतुर्विधो भाट्टानाम्, प्राभाकराणान्त्वभाव एव नास्ति। भाट्टा अन्यथाख्यातिवादिन:, प्राभाकरास्त्वख्यातिवादिन:। ख्यातिर्नाम भ्रम:।

एवमतिसङ्ग्रहेण भट्टप्रभाकरयोर्मतभेद: प्रदर्शित:। वाराणसेयहिन्दूविश्वविद्यालये पूर्वमधीयानस्य मे आचार्यतृतीयवर्षे निबन्धपत्रमप्येकमासीत्। तत एव वाक्परीक्षापि क्रियते स्म। स च निबन्ध: 'भट्टप्रभाकरयोर्मतभेद:' इति नाम्ना लिखितो मया शतपृष्ठात्मक:। स च 'प्राची' इति हिन्दूविश्वविद्यालयीयपत्रिकायां अष्टात्रिंशदधिकैकोनविंशतितमे ईशवीये वत्सरे प्रकाशित:। तत्र विस्तरेण पदार्था विशदीकृतास्सन्ति। अद्य यावन्मया ये लेखा लिखिता: प्रकाशिताश्च तेषां सङ्ग्रहाय वाचस्पत्युपाध्याय: मण्डनमिश्रश्च यतमानौ वर्तेते। न केवलं लेखानां सङ्ग्रहाय किन्तु तेषां प्रकाशनायापि तयोरुत्साहो दृश्यते। तयोर्यत्नस्सफलो भवत्विति परमेश्वरमभ्यर्थये। दर्पणस्य प्रतिबिम्बं विलोक्य वयं प्रसीदाम:, तथैव लेखानां प्रतिलिपिं विलोक्य तद्गतान् दोषानवगत्य तान् दूरीकर्तुमभिलषामि।

अन्ते च सप्रश्रयं निवेदयितुमिच्छामि यद् दिल्लीविश्वविद्यालयाधिकारिण: विशेषतश्च संस्कृतविभागाध्यक्षा: श्रीमन्त: ब्रजमोहनचतुर्वेदिमहाभागा अन्येध्यापकाश्च अल्पज्ञमपि मामत्राहूय मह्यमध्यापनाय भाषणाय चावसरो दत्तस्तैरिति तेभ्य: सर्वेभ्य: स्वीयां कृतज्ञतामाविष्कुर्वन् विरमामि।

# संस्कृतकाव्यशास्त्रस्य नवीना उपलब्धयः

येषां काचन सौहृदादरमयी गाथा पुराणां प्रति
विद्वत्तल्लज-शारदां हृदि नुमस्तानद्यकल्पद्रुमान्
नो चेदद्भुतमीरितं किमपि यत् केनापि तन्निर्भयं
स्वीयं घोषयतां युगेऽत्र कठिनी-व्यापारणैवाऽज्ञता।।

**अथ साहित्यशास्त्रम्।** संस्कृतमद्यापि ध्रियत इति विस्मयकरम्। किन्तु इदमपि विस्मयकरं यदद्य साहित्यशास्त्रे संस्कृतं प्रतिनवायते। त्रेधा विभागे य आद्य आसीत् समयः विकारितः स मध्यवर्त्तिभिस्तत्ता नूत्ननूत्नाः परिभाषाः समादृत्य। तत्कृता या विकृतयस्तास्वेवातितरां श्रदधायि विगतानि त्रयोदश शतकानि यावत्।

**विकार**ः–को वाऽजनि विकारः साहित्यशास्त्र इति प्रश्ने ब्रूमो 'महर्षीणां तिरस्कार' इति। प्रमाणमीमांसायां तत्त्वदृशां महर्षीणां यः पन्थाः स खलु पुराविद्भिः 'आगम' इति शिरसा वन्दितः। तस्यावज्ञानम् अकारि अवन्तिवर्मसभाकविभिः। मिष्ट-मृष्ट-वचोभिरेभिः समुत्थापित एको महान् गुल्मः (ज्नउवत) संस्कृत-साहित्यशारदाया अङ्गे। ध्वनिपदवाच्यः सः। अत्रैव झञ्झावाते भ्रान्ताः कतिचन महामेधसो महामाहेश्वरा अपि। समकालिकैर्न्यक्कृतोऽप्यसौ ध्वनिर्मम्मटादिभिः समाद्रियत। मम्मटेन तत्समर्थने यैस्तर्कब्रुवैः प्रतिबन्दिनस्तूष्णींस्था-पितास्तेषामप्यानुपूर्वी साम्प्रतं यावत् तेषु तेषु ग्रन्थेषु प्ररूढाऽभिलक्ष्यते। दौर्भाग्यं चेदं यत् त एव ग्रन्थाः पाठ्यक्रमेषु सार्वत्रिकाः आ संस्कृतविश्वविद्यालयेभ्य आ च संस्कृतविभागेभ्यः।

ध्वनिवादिनां मते ध्वनयः पञ्चविधाः–

1. शब्दरूपाः (ध्वनतीति)
2. अर्थरूपाः (वाक्योऽर्थः)
3. व्यापाररूपाः (ध्वननम्)
4. ध्वन्यतेऽसौ (ध्वन्यमानोऽर्थः)
5. ध्वन्योऽस्मिन्निति काव्यम् (काव्यम्)

पञ्चमस्य ध्वनित्वे चमत्काराधिक्यमपि प्रयोजकं भवति, यत्र चमत्कारातिशयो ध्वन्यर्थकृतः स एव ध्वनिपदवाच्यः काव्यबन्धः।

**अथ प्रश्नः**–'तस्यास्य ध्वन्यर्थस्य प्रतीतौ प्रमाणं किमिति, अर्थात् केन वा प्रमाणेनासौ प्रतीतिपथमारोहती'-ति। अत्र प्राचीनः सम्प्रदायः–'अनुमितिः' इति। अपरेऽर्थाः प्रतीयन्ते, प्रतीतिश्चानुमेति तेषां तर्कः। ध्वनिवादिनः पुनर्नवीनं विकल्पमाददति। तन्मते 'अनुमानं प्रमाणं भवती'-ति न शक्यमिदं प्रतीयमानार्थप्रत्यायनेन स्वीकर्तुम्। प्रतीयमानस्यार्थस्य सर्वविधाऽप्रामाण्यालिङ्गितत्वात्। तत्र हि शब्द एवं प्रमाणं येन श्रुतेनास्य प्रतीतिः। इदमेव खल्वन्तरं हेतुव्यञ्जकयोर्यदेकत्र सर्वविधाऽशिथिलता, अपरत्र व्यञ्जके पुनः शैथिल्यमेव प्ररोहहेतुरिति। विस्मृत एभिर्हेत्वाभासाश्रितानुमानपक्षः। विस्मृतं चैभिर्हेतुगतो व्यभिचारोऽनुमानगतं प्रामाण्यमेव हिनस्ति, नाऽनुमानत्वमिति।

सोऽयं संस्कृतसाहित्यशास्त्रस्य द्वितीयः समयखण्डः। अत्रैवाजायन्त अश्रुतपूर्वस्य ध्वनेः प्रवर्त्तयितारो महात्मानः। एते बहिर्वैदिकाः, मनसि पुनर्बौद्धाः। एतेष्वेवापतति तत्रभवान् विनीतोत्तम आनन्दवर्धनः। कथमिति चेदवदधत्वत्रभवन्तस्तस्याऽस्य कवेः शब्दान्। असौ कथयति–'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः [1.1ध्व.] इति। क इमे बुधा इति तु न वक्ति। तथ्यं त्विदं यदानन्दवर्धनात् पूर्ववर्त्तिनामाचार्याणां ग्रन्थेषु ध्वनिशब्दोऽपि न दृश्यते। कुत्र ध्वनिः आम्नातः कुत्र पुनः समाम्नात इति पृष्ट आनन्दवर्धन उत्तरमन्यथति।

'ध्वनि'-शब्द इदम्प्रथमतया प्रायोजि भगवता व्यासेन अग्निपुराणे साहित्यागमं प्रस्तुवता। तस्य च प्रामाण्यं कदाचिन्नोररीकरोति ध्वनिकारः। अयमर्थोऽस्माभिर् 'अलं ब्रह्म'-प्रभृतिषु ग्रन्थेषु वितत्य दर्शितस्ततस्तत एवावधार्यः।

द्वितीय आगमविरोधः 'अलं'-पदस्य न्यक्कारः। 'अलंपदम'- ग्निपुराण एव ब्रह्मणो वाचकम्–

**अक्षरं परमं ब्रह्म सनातनमलं विभुम्।**
**वेदान्तेषु विदन्त्येकं चैतन्यज्योतिरव्ययम्॥**' [338/1]

साहित्यस्य मेरुदण्डश्चमत्कारः। चमत्कारं विना कस्यापि तत्त्वस्य काव्यधर्मत्वं न ह्येव स्वीक्रियते सम्पूर्णयाप्याचार्यपारम्पर्या। स च चमत्कार आनन्दरूपः, रसरूपः, आह्लादरूपश्च। आनन्दश्च साक्षाद् ब्रह्मैवेत्यस्माकं सर्वेषां वैदिकानां मतम्। ध्वनिवादेऽप्याह्लाद एवं सर्वंसहः। ततश्च तत्रापि नास्ति विमानना ब्रह्मतत्त्वस्य। यावद् बौद्धोऽपि ब्रवीति चे-'न्नास्ति परो लोक' इति तर्हि सोऽप्यात्मानं न निराकुरुते। ततश्च सोऽपि ब्रह्मवादी। तस्य ब्रह्म सनातनं नित्यं च न भवतीति कथान्तरम्। अस्माकमपि चेतन एव काव्यं रसयति, न गतासुः।

एवम् 'अलं' पदस्य यो महिमा स हि औपनिषदस्य सम्प्रदायस्य निधिः। न शक्यते स निराकर्त्तुं न्यक्कर्तुं वा। न्यक्कृतश्चासावानन्दवर्धनेन–

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥**
**तमर्थमुपकुर्वन्ति येऽङ्गिनं ते गुणाः स्मृताः।** [8/67, का.प्र.]
**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्॥**

इति [2/6,7 ध्व.]

सहस्रशो ह्यलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च महात्मभिः, न च तेषामेषा दशा श्रूयते इति।

'भम धम्मिअ' इत्यादिकाः प्राकृतगाथा आद्रियमाणेन भूम्ना, उदाहरता च यथार्थं स्वविरोधं–

**यस्मिन्नस्ति न वस्तु किञ्चन मनःप्रह्लादि सालङ्कृति-**
**व्युत्पन्नै रचितं न चैव वचनैर्वक्रोक्तिशून्यं च यत्।**
**काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो**
**नो विद्मोऽभिदधाति किं सुमतिना पृष्ठः स्वरूपं ध्वनेः॥**

इति। अत्र या या अनुपपत्तयस्ताः सर्वा अपि सम्मान्या एव। विचारयन्तु भवन्त एतेषु को वा गुणो लभ्यते 'भम धम्मिअ' इत्यादिनि प्राकृते बन्धे। विधिमुखेन निषेधस्य प्रत्युपस्थित्या पर्यायोक्तालंकारः कथञ्चिदूरीक्रियेत।

**नवीनं प्रस्थानम्**

काश्यां संस्कृतविश्वविद्यालयस्य यस्मिन् 1958 वर्षे प्रतिष्ठा ततः परं कतिपयानि वर्षाणि तत्र गोष्ठ्यः सञ्जायन्ते स्म। तास्वेवासीदेका गोष्ठी 'किं तावत् काव्यजीवितमि'-ति विषये। अस्माभिरपि तत्र काव्यात्मविषये प्रश्न उपस्थापितः–'यस्यात्मा तत्रैव स वसति, काव्यस्यात्मा पुनः काव्यभिन्ने रसिके'–इति। असमाहित एव स्थित एष प्रश्नः। अस्माभिस्त्वस्य समाधिरुपस्थापितः–

रसः काव्यात्मा। रसश्च द्विरूपः 1. आस्वादरूपः, 2. आस्वाद्यरूपश्चेति। आस्वाद्यरूपस्य रसस्य रसत्वमिक्षुरसादिपदेषु प्रसिद्धमेव। आस्वादरूपो यो रसस्तस्याधिष्ठानं प्रत्यक्चैतन्यमिति दार्शनिकेषु प्रतीतमेव। अनयोर्द्वयोर्यश्चरम आस्वादात्मा रसः स न सम्भवति काव्यशरीरे तस्य शब्दात्मतया, शब्दार्थज्ञानतया वा, जडत्वात्। तस्याधारः प्रत्यक्चैन्यमात्रमेव। आस्वाद्यरूपो यो रसः स्थाय्यादिरूपः। सोऽपि द्विशाखः 1. वासनात्मतया रसिकनिष्ठः, 2. अभिव्यञ्जकत्वेन काव्यनिष्ठश्चेति। अभिव्यञ्जिका या सामग्री सा विभावानुभावव्यभिचारिसात्त्विक-

भावरूपा, रूपकौपम्यादिरूपा, कोमलपरुषसमस्तदसमस्तपदरूपा चेति। इक्षुरसन्यायेन सेयं सर्वापि सामग्री रसनीया भवतीति अस्या अपि सञ्ज्ञान्तरं रस इति। आस्वाद्येनैतेन रसेन काव्यं दण्डिप्रभृतिभिराचार्यै रसवदित्युच्यते। गणित एष विशेषो दण्डिनमारम्भ्य रुद्रटं यावद् आचार्यैरलङ्कारवर्गे। रुद्रटेन पुनरुपस्थापितो रसानां काव्यधर्मान्तरापेक्षया प्रामुख्यमिति पक्षः। आनन्दवर्धनः पुनः प्रौढिवादमाश्रितो व्यवस्थान्तरं प्रतिपद्यमानो दृष्टः–

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥** [2/5 ध्व.]

रसवत्त्वं पुना रस एव। सेयमभिव्यञ्जिका सामग्री ध्वनिवादे साऽकुतोमुखी। काव्यस्य सर्वानुभवसिद्धो विशेष एष यदि नास्त्यलङ्कारो गुणो वा, तर्हि ध्वनिवादे किमस्य सञ्ज्ञानम्। ध्वनिवादिनो मौनमत्रालम्बन्ते। भोजस्तामिमां रसायोक्तिरिति मनसिकृत्य वर्गविशेषमेकमलङ्काराणां विकल्पयति 'रसोक्ति'रिति। अन्यौ च द्वौ वर्गौ स्वभावोक्तिरिति गुणविशिष्टानां काव्यानाम्, वक्रोक्तिश्च रूपकोपमादिधर्मविशेषयुक्तानां काव्यानाम्। तदिदं काव्यधर्माणां वर्गत्रयं प्रसिद्धं भोजस्य सरस्वतीकण्ठाभरणालङ्कारे शृङ्गारप्रकाशनाम्नि साहित्यप्रकाशे च–

**'स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्'**

इति। सामाजिकनिष्ठस्यास्वादरूपस्य रसस्य काव्यनिष्ठेनानेन रसेन व्यञ्जकत्वं सम्बन्धः। आस्वाद्यरसो व्यञ्जकः, आस्वादश्च व्यङ्ग्य इति। वस्तुतस्तु स्फोटमिव ध्वनिः काव्यनिष्ठाऽऽस्वाद्या विभावादिसामग्री प्रतिबिम्बकल्पां तामेव सामाजिकात्मनि स्थितां सामग्रीं प्रोद्बोधयति। प्रबुद्धा तु सा प्रत्यक्चैतन्यमुपसद्य, स्वविषयकं तन्निष्ठमावरणं निवारयति। प्रत्यक्चैतन्यमिदानीं सामग्रीमिमामास्वदते, तया च सहात्मानमपि। त इमे सर्वे भावाश्चित्तवृत्तिरूपा भवन्तीति साक्षिचैतन्येन गोचरीक्रियन्ते। अयं यो गोचरः अयमेव ब्रह्मात्मा रसः। नास्तीदानीमापत्तिः परस्थस्य परशरीरात्मत्वस्य।

नूतने च काव्यशास्त्रे शब्दशक्तितत्त्वमनुत्थानपराहतमेव एतदुक्तं–

**यदि शब्दस्य देहे स्याच्छक्तिः सूर्ये प्रकाशवत्।**
**तदा विश्वस्य भाषाऽपि भवेदेकैव केवले॥**–ति

यश्च शब्दशक्तिरिति व्यवहारः स भाक्तः, शब्दस्य ज्ञाने या शक्तिस्सा शब्द आरोप्यैवं व्याहाराः। उच्यते मम्मटेनापि 'लक्षणाऽऽरोपिता क्रिये'–[का.प्र., 2/9] ति। 'सङ्केतसहाय एव शब्दोऽर्थं प्रतिपादयती' [का.प्र., 2/7 वृत्ति]–ति च। शब्दश्च ज्ञानं चेति नानर्थान्तरम्, वैशेषिकेषूभयोरपि पृथग्गुणत्वेनाम्नातत्त्वात्, शाब्दिकेषु शब्दो ब्रह्मैवेति परिहृतं अर्थान्तरत्वम्, तथापि विषयविषयिभावेन प्रसिद्धयोर्ज्ञानविषययोर्भेद एव व्यावहारिकः। तदित्थं नवीनतमे काव्यशास्त्रे 'शब्दस्य

शरीरे न सम्भवति काचनापि स्वत एवार्थबोधसामर्थ्यरूपा शक्तिरिति' नूत्नः पक्षः।

ध्वनिवादः शब्दं विहायार्थतः प्रवृत्तिं भजमानो निकृन्तिततरां रचनापक्षरूपमर्धं काव्यस्य। आनन्दवर्धनसमकालेन किञ्चित्पूर्ववर्त्तिना वा भट्टरुद्रटेन स्वकीये षोडशाध्यायात्मके 'काव्यालङ्कार'-नाम्नि महाग्रन्थे शब्दस्य रचनायै अष्टावध्याया निरधारिषत, तत्र चक्रबन्धादयोऽपि स्वयं विरच्योदाहृताः, तेषां निर्माणस्य विधिरप्युपदिष्टः। आनन्दवर्धनः स्वयमपि देवीशतकसंज्ञकं काव्यचक्रबन्धादिशिक्षाया एव कृते निबबन्ध। यमकादिनिबन्धं शृङ्गारादिविषयातिरिक्तविषयत्वेन प्रतिबध्नन्नानन्दवर्धनो नितरां जागरूकः। उपदिशति स-

**रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित्।**
**एकेनैव प्रयत्नेन निर्वर्त्त्यन्ते महाकवेः॥**
**यमकादिनिबन्धे तु पृथग्यत्नोऽस्य जायते।**
**शक्तस्यापि रसेऽङ्गत्वं तस्मादेषां न विद्यते॥**
**रसाभासाङ्गभावस्तु यमकादेर्न वार्यते।**
**ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यते॥** [ध्व. 2.16 सङ्ग्रहकारिका।]

भूयोऽपि स एव समनन्तरेणैव कारिकाग्रन्थेन प्रतिजानीते-

**ध्वन्यात्मभूते शृङ्गारे समीक्ष्य विनिवेशितः।**
**रूपकादिरलङ्कारवर्ग एति यथार्थताम्॥** [ध्व. 2.17] इति

समीक्षामपि प्रस्तौति समनन्तरेण कारिकाद्वयेन-

**विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।**
**काले च ग्रहणत्यागौ नातिनिर्वहणैषिता।**
**निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्।**
**रूपकादेरलङ्कारवर्गस्याङ्गत्वसाधनम्॥** [ध्व. 2.18,19] इति

एवं हि नवीने काव्यशास्त्रे भोजराजादिवत् साहित्यनिर्मित्सावधूः, पूर्वं वाचि प्रशिक्षणमर्हति।

**क्रीडारसेन रहसि स्मितपूर्वमिन्दो-**
**र्लेखां विकृष्य विनिबध्य च मूर्ध्नि गौर्याः।**
**किं भूषिताहमनयेति शशाङ्कमौलेः**
**पृष्टस्य, पातु परिचुम्बनमुत्तरं वः॥**

इत्यस्मिन् वक्रोक्तिजीवितोद्धृते काव्यरत्ने विमृशन्तु काव्यस्य को धर्मो नास्तीति। अत्र शिवावालम्बनौ, रहःस्थितिरुद्दीपनम्, चन्द्रलेखाव्यापृतिः, स्मितं, भूषणप्रश्नश्चानुभावाः। पर्यायोक्तविधया दत्तमुत्तरमलङ्कारः। सौकुमार्याऽऽभिजात्य-

माधुर्यप्रसादादयः गुणाः। वैदर्भी रीतिः। वृत्तिश्च कैशिकी। तदित्थमस्मिन्नेकस्मिन्नेव सन्दर्भे काव्यस्य 'रसः, अलङ्कारः, गुणः, वक्रोक्तिः, औचित्यमि'-ति सर्वेऽपि धर्माः कृतपदाः। कथमत्र प्रतिपत्तव्यं किम्प्रधानेयमुक्तिरिति।

अथ प्रतिसम्प्रदायं कालविभाजनमपि रेखां विन्यस्य कर्त्तुं न शक्यम्। किञ्च काव्यशास्त्रेतिहासविद्भिर्मनीषिभिः पण्डितराज एव निर्धारितोऽवधित्वेन। ततः परं सञ्जातानामच्युतरायमोडकप्रभृतीनां साहित्यशास्त्रे निहितान्युदाराणि प्रस्थानानि क्व तिष्ठन्तु, तर्हि उपमादीनामपि गुणत्वमिव प्रसादादीनामप्यलङ्कार-त्वमुदघोषि, भोजादिभिरिव। कालान्तरे प्राधान्यं लम्भिता औचित्यादयो विशेषाः काव्यशरीरे प्रायेणाग्रजानुजभावं व्यतिरिच्य सहैव प्रादुर्भूताः, पर्यस्कारिषत तु ते कालान्तरेऽभ्यासदार्ढ्येन सुमेधोभिरिति तु नोद्घातसहो मार्गः। अथ सम्पूर्णमपि साहित्यशास्त्रं तन्निर्मातृभिर्यं मार्गमवलम्ब्य व्यचारि तेन मार्गेण धामचतुष्टये कल्पपञ्चके च पर्यवसितम्। तत्र धामानि (1) काञ्ची (2) शारदाभूः (3) महाकालक्षेत्रमुज्जयिनी धारा च (4) विश्वेश्वरधाम काशी'-ति। कल्पाः पुनः (1) पूर्णता (2) गुणकल्पः (3) लक्षणकल्पः (4) अलङ्कारकल्पः (5) साहित्यकल्पश्चेति। तत्र

1. **पूर्णताकल्पः।** काञ्च्यां भरतदण्डिनावाचार्यौ। एतयोः सिद्धान्ताश्च (1) पूर्णता (दोषाभावः) गुणाश्च। पूर्णत्वं नामान्यूनाधिकार्थपदत्वम्। यदुक्तं मल्लिनाथेन नानपेक्षितमुच्यत' इति। उक्तं च वक्रोक्तिजीवितकृता- 'अन्यूनाऽनतिरिक्तत्वमनोहारित्वभूषितार्थपदत्वमिति [1.17]। जातमात्र एव हि शिशुः पूर्णताञ्चितकाय एव दृश्यते। नास्य वक्त्रे लोचनद्वयं, कर्णद्वयं न भवतः, द्वित्वमेवानयोर्नियतम्, एकत्वमिव त्रित्वादिकं तु न स्वप्नेऽपि। सेयं पूर्णताभूमिः।

2. **गुणकल्पः।** ततो मार्दवे पारुष्यादिका गुणा विकसन्ति। एतेष्वायातेषु स्पृहणीयतादयो गुणाः प्रकटिता दृश्यन्ते। सेयं गुणस्थितिः।

3. **लक्षणानि।** 'भूषणाक्षरसङ्घातौ' इत्यादीनि 'विभूषणं चाक्षरसंहेतिश्चे'-त्यादीनि षट्त्रिंशल्लक्षणानि। तानि पुनरसङ्ख्येयत्वेन समाम्नातानि सुमेधोभिः। एतेषामस्फुटालङ्कारत्वमूरीक्रियतेऽस्माभिः। इयं हि अपूर्णा यात्रा अलङ्कारत्वप्राप्तौ। अत एव स्वयं भरतेनेव दण्डिना, तेनेव च धनञ्जयेन लक्षणानामलङ्कारत्वमेव समाम्नातम्, मम्मटेन पुनः काव्यलक्षणेऽदत्तप्रवेशान्यपीमानि 'क्वचित् पुनः स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरिति' ब्रुवताऽबोधपूर्वं स्पृष्टानीमानि लक्षणानि।

अलङ्कारः। चतुर्थः कल्पः पुनरलङ्कारकल्पः।

यत्र 'रसः, औचित्यम्, लक्षणानि, उपमादयश्च समवायं भजन्तः साहित्यनामकं साहित्यकल्पं सृजन्ति।

अत्र गुणकल्पे आचार्याः भरतादारभ्य वामनाचार्यं यावत् सर्वेऽपि। मध्ये समजायत बौद्धो भामहो येन अवज्ञाताः सर्वेऽपि गुणाः, ऋते माधुर्यं प्रसादश्च। ओजोऽपि नामग्राहं गृहीतं न पुनर्लक्षितम्। वामनः शब्दनिष्ठत्वेनार्थनिष्ठत्वेन द्वैविध्यं लम्भयित्वा विंशतिगुणानलक्षयत। समकालिक उद्भटः पुनर्गुणान् नामतोऽपि न सस्मार, तद्व्यञ्जिका वृत्तीस्तु निबबन्ध, एवमेव परवर्त्ती रुद्रटोऽपि गुणान् नोल्लिलेख, यावन्नामतोऽपि। सेयं जयादित्यनृपतिकालिकी स्थितिः। एकत्र गुणस्य काव्यात्मत्वम्, अपरत्रालङ्कारस्येति भिन्नपथीनौ समकालभुवौ वामनोद्भटौ। ननु वामनेन 'रीतिरात्मा काव्यस्ये'-ति प्रतिज्ञातम्, तत् कथमुच्यते गुणात्मवादी स इति, साधु मोह एषोऽर्थवादकृतः। अर्थवादवाक्यमिदं यद् 'रीतिरात्मा काव्यस्ये'-ति। अर्थवादत्वमस्य परवर्त्तिभ्यां सूत्राभ्यां स्पष्टभूयिष्ठम्। तथाहि–

**'रीतिरात्मा काव्यस्य**
**विशिष्टा पदरचना रीतिः**
**विशेषश्च, गुणात्मा'** इति त्रीणि सूत्राणि।

सन्दर्भणस्वारस्यमेषामिदमेव यदुच्यते 'गुण आत्मा काव्यस्ये'-ति। सोऽयं गुणकल्पः भरतमुनिमारभ्य वामनं यावत्। इदंकल्पेन प्रसाधितमर्थविशेषव्यवच्छिन्नस्य वाक्यस्य काव्यत्वम्। यथैतत् तत् स्पष्टीकृतम् उद्भटकाव्यालङ्कारसार-विवृतौ प्रतीहारेन्दुराजेन परिपोषक्रमे लक्षणकल्पः अस्फुटालङ्कारकल्पः। उक्तमस्माभिः स्फुटं काव्यालङ्कारकारिकायाम्–

**अलङ्क्रिया सखी चैनामनवाप्तप्रपूर्णता।**
**लक्षणत्वेन वीक्ष्येत भरतादिमनीषिभिः॥** [का. 229]

अन्यदपि विचारजातं लक्षणतत्त्वविषये 221-228 कारिकाभिरस्माभिरेवोपनिबद्धम्। तत् तु तत एव द्रष्टव्यम्।

इदञ्चात्र लक्षणाख्यानां वाक्यधर्माणां विषये प्रोच्यते यदिमेऽभिनवगुप्तेन सङ्ख्यातुमशक्याः प्रतिज्ञाताः। परम्पराद्वितये चतुष्पञ्चाशद् आसन् लक्षणानि 18 उभयसमानि, 18, 18 च प्रातिस्विकानीति कृत्वा। भोजेन सङ्ख्यायामस्य 64 त्वमापादितम्, दश नूतनानि लक्षणानि लक्षयित्वा, असङ्ख्यातत्वपक्षोऽपि समर्थित एकाधिकानि लक्षणानि लक्षयता। तथाहि भोजेन प्रतिज्ञातं चतुष्षष्टित्वं लक्षणानां, निदर्शितं च पञ्चषष्टित्वम्, ततोऽप्यधिकस्य सङ्ख्यानस्य संभावनामनिराकुर्वता। आजानुबाहुत्वम्, कमलपत्राक्षत्वम्, प्रांशुत्वम्, सोष्णीषत्वं यथा मनुष्यत्वावच्छिन्नायां जातावतिशयमादधाति, तथैव लक्षणान्यपीति शरीरदृष्टान्तेन स्फुटमिदम्। समयावधिरस्य कल्पस्य भरतमादाय भोजावधिः 1300 वर्षाणि।

**4. अलङ्कारकल्पः।** अथालङ्कारकल्पः। इमं स्तरं यावत् सर्वेऽपि काव्यधर्मा

विविक्ततामानशिरे। तेन सर्वेषामेकैव सञ्ज्ञा प्ररूढा 'अलङ्कार' इति। अत्रालमिति ब्रह्मपर्यायः अग्निपुराणे प्राप्तात् साहित्यागमाल्लब्धः। अभिनवगुप्तो रसपदमाद्रियते, समकालिको भोजश्च शृंगारापरपर्यायमहङ्कारगुणविशेषम्, केनापि च हेतुना स्वकीयमागमग्रन्थं न स्मरति अग्निपुराणम्। किन्तु रसमप्यलङ्कारत्वावच्छिन्नीकुरुते। ध्वनिनामाऽपूर्वः संज्ञामात्रसारः काव्यधर्मत्वेन प्रचारितो विशेषोऽपि 'अलङ्कार'-कल्प एव समापतति, 'औचित्यम्, वक्रोक्तिः' इत्यमीषामप्यत्रैव गणना। ततश्च योऽयमलङ्कारकल्पः, एतस्य कल्पान्तरसम्प्लवत्वं स्फुटतया सम्पन्नम्। 'क्रीडारसेने'-ति यत् काव्यमुपस्थापितपूर्वं तस्मिन् तत्सादृश्यभाक्षु चान्येषु काव्येषु साहित्यकल्पघटकत्वेन कल्पना क्रियेत।

**5. साहित्यकल्पः।** साहित्यकल्प एष आरभ्यते भोजराजात्। तेनैव महोदयेनेदं-प्रथमतया साहित्यप्रकाशनाम्नि शृङ्गारप्रकाशे साहित्यस्यास्य द्वादशविधत्वस्य लक्षणोदाहरणैरुपस्थापितत्वात्। द्वादश चेमानि साहित्यानि शृङ्गारप्रकाशे तेन महाराजेनैवं निरूपितानि–

1. अभिधा 2. विवक्षा 3. तात्पर्यम्, 4. प्रविभागो 5. व्यपेक्षणम् 6. सामर्थ्यम् 7. अन्वयः 8. एकार्थीभावः 9. दोषहानम् 10. गुणोपादानम् 11. अलङ्कारयोगः 12. रसावियोगश्चेति ( शृ.प्र. 1. आरम्भे)। एतेषां सर्वेषां निरूपणानि च लक्षणोदाहरणाभ्यां नवमात् प्रकाशाद् एकादशं प्रकाशं यावत्कृतानि।

परवर्त्तिषु भावप्रकाशनकारः शारदातनयः साहित्यमीमांसाकारश्च साहित्यमिदं स्वीचक्रतुः, परिष्कारं च तत्रोपस्थापयाञ्चक्रतुः। ततः प्रभृति 'साहित्य'-परिभाषा साहित्यशास्त्रे प्रसिद्धेः परमं शिखरमारुक्षत्।

सोऽयं धामचतुष्टयवादः कल्पपञ्चकवादेन सह नवीन उपन्यासः। धामचतुष्टयं श्लेषेण परिस्तौति सनातनः–

**वन्देऽहं भारतं वर्षं चतुर्धामप्रतिष्ठितम्।**
**वन्दे साहित्यशास्त्रं च चतुर्धामप्रतिष्ठितम्॥** इति

कल्पपञ्चकवादायाऽपि श्लोकः–

**साहित्यशास्त्रे यत् कल्पपञ्चकं कल्प्यते ततः।**
**पञ्चवक्त्रः शिवस्त्वेष रसब्रह्म नुमस्त्विमम्॥** इति

पञ्चमाय कल्पाय पुनः प्रोच्यते–

**इदं न खुल पुस्तकं सर इदं सरोजावली-**
**शतेन परिभूषितं शुचिरसं च वासन्तिकम्।**
**लसन्ति तु विकस्वरा इह समं हि पद्मोत्तमाः**
**समेऽपि सितपक्षकैर्द्विजवरैश्च संश्लाघिताः॥**

सम्प्रदायपारम्पर्येऽपि सूक्तिरियमाद्रियेत–

**इदं प्रथममुद्गतं, परमिदं, परस्तात् ततो-**
**ऽप्यदः कमलमित्यसौ क्रममतिविकासेऽस्तु वः।**
**वयं परिमलप्रियाः, स च सदैव सञ्जायते**
**समाप्लवनसौभगादिति भिदत्र कूर्मीपयः।** इति।

**काव्यलक्षणम्**–इदंयुगे काव्यं लक्ष्यते–

आनन्दकोशस्योल्लासे लोकोत्तरविभावना।
अलङ्कृतार्थसम्वित्तिः शाब्दी चेत् काव्यमुच्यते।।

आनन्दकोशो वेदान्तेषु प्रतीतः। तस्योल्लासो नामावरणभङ्गः। तत्र यस्या अलौकिकं सामर्थ्यं तादृशी या अलङ्कृतस्यास्य शाब्दी संवित्तिः सा एव भगवती काव्यमित्युच्यते। प्रतिभा तस्याः परं नाम। एवं लोकोत्तरविभावनावत्त्वे सत्यानन्दकोशोल्लासकत्वे च सति सालङ्कारार्थसंवित्तिः काव्यमिति फलितम्। सालङ्कारोऽर्थो नाम अलङ्कारयुतत्वेनैव काव्यत्वमापन्नोऽर्थः। ततश्चालङ्कारस्यैव काव्यात्मत्वम्। स चालङ्कारः साहित्यागमे ब्रह्मात्मेति धन्य-धन्यमिदं शास्त्रम्।

यश्चासौ साहित्यागमस्तस्य सञ्ज्ञाऽग्निपुराणस्यान्तिमे अध्याये 'अहङ्कार' इति, कारप्रत्ययोऽत्र एवकारवषट्कारादिवत् स्वरूपार्थः, ततश्च य एवालमर्थः स एवालङ्कारार्थः। एवं च अलङ्कारोऽपि ब्रह्मवाचकत्वेन रसवाचकत्वेन च स्वीकर्त्तुं शक्यः। या च ध्वनिवादिनां कटककुण्डलाद्युपमा तयापि न हीयतेऽलङ्कारपरिभाषाया माहात्म्यम्, सरिद्वीचीन्यायेनालङ्कारत्वसामान्यव्याप्यजातिमत्त्वेन तस्याऽप्युपसंगृहीतत्वात्। भूष्यभूषणयोर्मध्ये यो भेदः स दृष्टिसंकोच एव, द्वयोः संप्लवस्यैवादरणीयत्वात्। एवं च सरसे काव्ये य उपमादिस्तस्यापि रसत्वमेव, न हि पानकादिषु घटकद्रव्याणां भवति पार्थक्येन गणना, तथा सति भावध्वनित्वमापादयेरन् सहृदयाः। अपोद्धारपदार्थत्वेनाभिमन्येरन्निमे सर्वेऽप्युपमादयो धर्माः, काव्यस्फोटे तेषामेषामेकत्वेनैव ग्रहात्। क एषोऽपोद्धारपदार्थ इति प्रश्ने वाक्यपदीयं शरणं, यदुच्यते तत्र-तत्र भगवता हरिणा–

**यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।**
**अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते।।** [वा.प. 2.10] इति
**द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधापि वा।**
**अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवद्।।** [वा.प. 3.1.1]
**पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा।**
**पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ।** [वा.प. 3.1.2]

**स्वा जातिः प्रथमं शब्दैः सर्वैरेवावधार्यते।**
**ततोऽर्थजातिरूपेषु तदध्यारोपकल्पना॥** [वा.प. 3.1.6] इति।

'यथा पदार्थद्वारेणे'-त्यादिना ध्वनिकारस्याप्ययमेव पक्षो मान्यः। अस्ति च साम्प्रतिकं साहित्यदर्शनम्। तच्च 'विभावना'ख्यम् भगवता भर्तृहरिणा सर्वेषामेवार्थानां विवर्त्तः प्रतिज्ञायते शब्दस्वरूपाद् अनादिनिधनाद् ब्रह्मणः। विवर्त्तश्च मृगमरीचिः, शुक्तिरजतम्, चित्रतुरगादिकम्, भूतभविष्यद्वर्त्तमानादिकम्, पूर्वपश्चिमोत्तरदक्षिणादिकं च। एतत् सर्वं गर्भीकृत्य भगवती कलाऽपि स्वयं वैवर्त्तिकी भागवती लीला। अधीयामहे शाकुन्तलं रामायणं वा। मानसे पटले मञ्च इव प्रत्युपतिष्ठन्ते शकुन्तलादयः पदार्थाः। समकालमेव च भिन्नभिन्नेस्वधिकरणेषु। एक एव रामो मुम्बय्यां प्रतिपद्यते, तदैव कलिकातायां काश्यामपि च। नास्त्येव च कलावद्ययुगान्तरजातः स सर्वथा। साऽपि च तस्य भुक्तामुक्ता जीवितपतिकाऽपि वैधव्यमनुभवन्ती परिधूसरवासा नियमक्षाममुखी धृतैकवेणि परमं प्रेयसी। नास्तीति न शक्यते प्रतिज्ञातुम्, प्रतिप्रयोगं तयोः शकुन्तलात्वेन दुष्यन्तत्वेनैव च ग्रहात्। केयं लीला। सोऽयम् असतः सद्भावः। ननु विवर्त्त एवासौ। तदुच्यते–

**अत्यन्ताऽसत्यपि ह्यर्थे शब्दो ज्ञानं करोति हि॥** इति।
**क्रीडतां मृन्मयैर्यद्वद्बालानां द्विरदादिभिः।**
**स्वोत्साहः स्वदते तद्वच्छ्रोतॄणामर्जुनादिभिः।**
[दशरूपके 4.42] इति च।

रूपकेष्वयमेवाध्यारोप आरोप इत्युच्यते–'रूपकं तत्समारोपाद्' [दशरूप. 1.7]। सदसतोस्तदतदर्थयोरिव याऽभेदबुद्धिः सैव सादृश्यमूला रूपकालङ्कार इत्युच्यते 'रूपकमेवालङ्काररूपब्रह्मस्पर्शकृदि'-ति। सत्त्वमसत्त्वं वा बाह्यस्याभ्यन्तरस्य वाऽर्थस्य सामाजिकान्तःकरणनिष्ठस्य भावस्य जागरणे न प्रयोजकम्, प्रत्ययमात्रमेव तत्रालम्। तदुक्तमस्माभिः–

**वयं न बौद्धा बाह्यार्थसत्त्वासत्त्वाविचारणात्।**
**वैदिकाश्च वयं न स्मः काव्ये शब्दत्वधिक्कृतेः॥** [178]

तर्हि के वा भवन्ति भवन्त इति पर्यनुयोगे प्रोक्तवन्तः–

**विश्वमात्रस्य यत् स्वस्तिवचनं तत्परायणाः।**
**वैदिकास्तु वयं बौद्धाः काव्याख्ये विश्वदर्शने॥** [179]

इति काव्यालङ्कारकारिकायाम्।

**भाषादर्शनमपि**

स्पष्टमद्य। तथाहि मध्यमात्मा या वाक् तस्यां याऽर्थमात्रा सा विश्वजनीना,

सर्वास्वपि बैखरीषु सा ह्येकरूपैव। या पुनः शब्दमात्रा तस्यां भवन्ति भेदाः। कस्याञ्चित् संस्कृतमिति, कस्याञ्चिद् आङ्ग्लीति तस्यामेव ध्वनिभेदाः। ध्वनयश्चामी विकल्पिता वक्तृभिः। ततश्च दृश्यते भावविशेषस्य वैखरी परिवर्त्तनमनुवादरूपम्। त इमे भाषात्वसामान्यव्याप्यतावच्छेदिकासु बैखरीष्वेव भेदाः। अत उच्यते काव्यालङ्कारकारिकायाम्–

**प्रातिभी या कवेः सृष्टिः संविन्मात्रैकविग्रहा।**
**सैव काव्यकला, तत्र भाषा भवति दर्पणः॥** [180]

इति। अथ संवदमाने लभ्येते काव्यकलया चित्र-मूर्त्ती। तदप्युक्तम्–

**इमां काव्यकलामेव मूर्त्तिश्चित्रं चुम्बतः।**
**किन्तु, राधायते काव्यकृष्णे भाषैव केवला॥** [181]

अत्र भाषा शब्दमात्रा प्राधान्यवती मध्यमा।

यश्चासौ शब्दस्तस्यापि काव्यशरीर उपाधित्वमात्रं भवति, नाङ्गत्वम्। अत्रोच्यते–

**उच्चार्यमाणताधर्मी शब्दो बाह्यो हि सर्वथा।**
**तथाप्यर्थं विना काव्यभावं नासौ प्रपद्यते॥** [69]
**अर्थश्च शब्दसंकेतलभ्यः काव्येऽपि दृश्यते।**
**सङ्केतश्चाप्यसौ ग्रन्थिरूपः शब्दार्थ-बोधयोः॥** [70]
**सङ्कतोऽपि ततो बोधरूप एवावतिष्ठते।**
**सम्बन्धो ज्ञानयोर्ज्ञानभिन्नो किन्नूपपद्यताम्॥** [71]
**शब्दः स्वबोधे संक्रान्तो बोधः संकेतके निजे।**
**संकेतश्च प्रबुद्धः सन् बोधमर्थस्य चुम्बति॥** [72]
**अर्थबोधोऽर्थ-बोधानामन्येषां सन्ततिं सृजन्।**
**चमत्काराऽमृतं प्रोक्ष्य रसिके याति काव्यताम्॥** 73 ॥
**एवं शब्दो बहिर्बाह्यः सन्नपि ज्ञानरूपताम्।**
**धृत्वोपाधिर्भवेत् काव्ये ज्ञानरूपे, न रूपतः॥** 74 ॥
**ज्ञानात्मकोऽपि शब्दः स्यादुपाधिः काव्यवर्ष्मणि।**
**पात्रं रसे पानकाख्ये दर्पणो वा तनौ यथा॥** 86 ॥
**यथा पात्रं च दुग्धं च भिन्नभिन्ने हि सर्वथा।**
**तथा शब्दश्च काव्यं च का न्वभिन्नात्मतैतयोः॥** 90 ॥
**यथा पात्रस्य भेदेऽपि दुग्धभेदः खपुष्पति।**
**तथा शब्दस्य भेदेऽपि काव्यभेदोऽश्मवृक्षति॥** 91 ॥

काव्यं शब्दस्य पौत्रम्

**कविः सहृदये येन स्वं काव्यं क्रामयत्यसौ।**
**उच्चारणात्मा शब्दोऽपि, किन्त्वेष तु पितामहः॥** 101 ।

**पिता तु काव्यपुत्रस्य शब्दज्ञानं हि विद्यते।**
**सुन्दरार्थसमुल्लेखस्वरूपस्य स्वभावतः॥** 102 ।
**पौत्रस्य राज्यलाभेन राज्यलाभः पितुर्यथा।**
**पितामहस्य चेत्येवं शब्दे काव्यमिति श्रुतिः॥** 103 ।

यदिदमर्थद्वयस्य कृते द्विदलन्यायस्योपन्यसनं तदपि विसदृशमेव। चणकान्नकणे वल्कलावृतं दलद्वयमन्योन्यजनकत्वं न बिभर्त्ति। प्रतीयमानार्थस्थले पुनर्मुख्योऽर्थः प्रतीयमानं प्रति जनकायते। ततश्च वक्तव्यमासीत्–

**अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।**
**अन्यः प्रतीयमानोऽपि तद्गर्भेऽर्थः प्रकाशते॥**

इत्येवमिव। एतेनार्थद्वये प्रतीतिक्रमः स्पष्टायेत। कदलीस्तम्भन्यायस्त्वत्राऽऽदरणीयः। यथाहि बहिः प्रकटिता कदलीस्तम्भत्वग् अन्तरपि त्वगन्तरं बिभर्त्ति तथैव शब्दादुपस्थितोऽर्थोऽन्तर्गर्भितो भवति प्रतीयमानेन। प्रतीयमानप्रतीतौ कारणं वाच्योऽर्थः धूम इव पर्वतवह्नौ। सोऽयमर्थगतो व्यापारः। नास्य स्वजनकशब्दव्यापारत्वकल्पना तर्कसहेति, यदा व्यञ्जनास्याः शब्दवृत्तित्वं व्युच्छिन्नम्, तदा का नु वार्त्ता तदेकशरणस्य ध्वनेः। उक्तमेव च नेदमनुमानत्वं यद्धि विनाशयति हेतुगतो दोषः अपितु अनुमानगतं प्रामाण्यमेव। न च काव्यस्य प्रामाण्याप्रामाण्याभ्यामर्थः एवं मृषोद्यमिदं यद् व्यञ्जनस्य शब्दवृत्तित्वं मृषोद्यमेव च तदौपयिकं ध्वनित्वम्। यच्चोक्तं मम्मटेन–

**शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः।**
**अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता॥** [का.प्र., 2.20]

इति। तत्र सहकारित्वं नाम निमित्तत्वम्, न तु मुख्यत्वम्। ततश्च रिक्तं वचो यत् प्रतीयमानप्रत्यये शब्दस्य हेतुत्वम्, दीपकृते प्रकाशे ज्योतिरेव प्रमुखं कारणं, न पुनः पात्रतैलादीनि, सहकारीणि भवन्त्यपि। तर्हि किम्प्रयोजना मम्मटकारिकेति प्रश्ने 'शब्दार्थौ काव्यमि'-ति प्रतिज्ञातचरस्य वचनस्य सिद्ध्या इति प्रतिपद्यस्व। प्रतिज्ञैव त्वेषा वैनाशिकमतमूला। कोऽत्र वैनाशिकः साहित्यशास्त्रे, दर्शनेषु तु कश्चिदिदन्तया प्रसिद्ध इति चेद् 'भामह' इति गृहाण। शब्दार्थौ सहितौ काव्यम्' तस्यैवोक्तिः। न केनापि पृष्ट एष किमिव सेत्स्यति साहित्यं शब्दार्थयोरिति। शब्दो हि तृतीयक्षणध्वंसी, अर्थश्च संकेतस्मरणानन्तरमागन्तेति कुत्रानयोः सहितत्वम्? शब्दज्ञानेन ज्ञातस्यार्थस्य साहित्यमिति तु 'आदेष्टा राष्ट्राधिपः, शासनादेशे स्वहस्ताश्च सम्बद्ध-सचिवनाम्नो भृत्यस्ये'-ति कथा। उक्तमेवान्या हि शब्दत्वावच्छिन्ना व्यक्तिः, अन्या च विषयविषयित्वमनयोः, न तु साहित्यमिति। ननु ज्ञाननिष्ठमेवाभ्युपेयतां शब्दार्थसाहित्यमिति तर्हि कथं

नोच्यते काव्यं गुणपदार्थ इति शब्दस्येवापि तार्किकेषु गुणत्वस्यैव प्रसिद्धेः। यच्च शाब्दिकानां द्रव्यत्वं तस्य तु गन्धोऽपि न ग्राह्यः, तत्र द्रव्यत्वं ब्रह्मत्वसतत्त्वम्, न च सिद्ध्यति तेन व्यावहारिकः कश्चनाप्यर्थः, का कथा वराकस्य विवर्त्तकल्पस्य काव्यत्वस्य किञ्च का गतिरत्र ज्ञानस्य? ज्ञानमपि चित्कलैव ब्रह्मणः। न च भवन्ति गुणालंकाराश्च ब्रह्मणि। एवं साहित्यपक्षे भूयान् झञ्झाघातः। शब्दार्थयुग्मकाव्यतावादिनः पुनः सर्वेऽपीमे ध्वनिमार्गिणः। यावदसौ भोजोऽपि तत्रैवावलम्बितो वेतालः। यश्चासौ शब्दार्थपक्षस्तत्र नास्त्यसौ व्याकोपः। प्रतिपादकत्वसम्बन्धेनार्थविशिष्टः शब्दविशेष एव तत्र काव्यमिति प्रशस्तः पन्था एषः। उक्तञ्च पण्डितराजेन जगन्नाथेन 'रमणीयार्थप्रतिपादकः शब्दः काव्यमि'-ति, विश्वनाथेन 'वाक्यं रसात्मकं काव्यमि'-ति, 'वाक् काव्यनामभागि'-ति जयदेवेन च। वागपीयं विज्ञानात्मैव, न तु व्याहाररूपध्वनिसतत्त्वा।

सेयं नवीनानां काव्यलक्षणमीमांसा। एतस्मिन्नेवार्थे पर्यवसायीनि भूयांस्येव भवन्ति वचनानि 'काव्यालङ्कारकारिकायाम्'। तानि तत एवावसेयानि।

**रसनिष्पत्तिः**

रसनिष्पत्तिप्रक्रियायामपि भिन्न एव विचार आधुनिकानाम्। काव्यनाट्याभ्यां सामाजिकानां प्रसुप्ता भावसंस्कारा एव प्रबोध्यन्ते, न त्वनुभाव्यन्ते ते, येन रसीभवेयुः। यश्च रसनिष्पत्तेः प्रश्नः स खलु दार्शनिकेषु समाधेयः। ते खलु विचारयन्तु असतामपि दुष्यन्तादीनां कथं कामाभिनिवेश इति। ननूपस्थापितानि सूत्राणि भाष्याणि च रसमाश्रित्य महता संरम्भेण 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्ति'-रित्यादीनि। कथमिदमि'-ति पृच्छ्यते चेच्छ्रूयताम्-व्यसनमिदं तेषामिति, एतद्विचारं विनापि साहित्यस्य सर्वेषां योगक्षेमाणां प्रसिद्धेः। पर्यत्याजि चासौ विचारमार्गो भोजादिभिः। गृहीतानि च यन्नामानि अभिनवगुप्तपादैरभिनवभारत्यां लोल्लटदण्डिशङ्कुकभट्टनायकादीनां तेषां केवल एको दण्डी यस्य काव्यलक्षणग्रन्थो लभ्यते काव्यादर्शो नाम। नास्ति च तेन संवादोऽभिनववचनेन। अन्येषां ग्रन्था एवाऽसुलभा इति तन्मतपरीक्षणमभिनवोक्त्यधीनमेवेति दुर्बलतरः स पक्षः। अस्ति च भट्टनायकस्य रसभोगपक्षो महाकालेश्वरधाम्नि सर्वेषां धनञ्जय-धनिक-भोजराजानां सम्मतः। महात्मनो महामाहेश्वरस्य तु कथमुचितायते भोग इति तस्य विप्रतिपत्तिरेव सदृशी। अस्ति च तस्य 'हृदयदर्पण'-नामा ग्रन्थोऽभिनवमात्रेण दृष्टः, किञ्चित् परवर्त्तिनो व्यक्तिविवेककृतो महिमभट्टस्यापि दृग्गोचरं न यातः सः। उच्यते चाभिनवेन

**तस्मात् सतामत्र न दूषितानि**
**मतानि तान्येव तु शोधिता**'-नीति।

स एष समुदारहृदय आचार्यः प्रष्टव्यः कथमाचार्यवर्यैरत्रभवद्भिः पूज्यपादसत्तमैः न प्रकटितः स्वकीयः पक्षः इति। अभिनवगुप्तः खलु शिवागमी। अस्ति च तेषां पृथगेव रसनिष्पत्तिसंप्रदायः। स खलु परवर्तिनि भावप्रकाश-वेधसा शारदातनयेन विव्रियते, न भवता स्वयम्, यद्यपि विद्यते भवत्सु स्वमार्गवासना यद्वशादत्रभवतां

**'यस्तन्मयान् हृदयसंवदनक्रमेण**
**द्राक् चित्रशक्तिगणभावविभागभागी।**
**हर्षोन्मिषत्परविकारजुषः करोति**
**वन्देतमां तमहमिन्दुकलावतंसम्।।** इति।

'यो वै छलेन निजशास्त्रनिगूहनाख्येनाविर्भवत्ययमहो कथमन्यदीयाम्, वाचं यथायथमुपासितुमात्तरंहः मन्येत, तस्य वचनं प्रमिणोतु के वा'–इति।

| |
|---|
| 1 |
| 2 |
| 3 |

प्रथमदूषकस्य द्वितीयस्य दूषकस्तृतीयो यदि दोषी, तर्हि कथं न द्वितीयः। प्रथमे हि साहित्याचार्या भरतदण्डिनावादाय वामनोद्भटरुद्रटाः। तेषां सिद्धान्ता आगमसमर्थितास्ते च रुद्रटसमकालेनानन्दवर्धनेन न्यक्कृताः, आदृताश्च यो बौद्धो भामहस्तस्य सिद्धान्ताः। वैदिका बौद्धाश्चेत्युभये प्रसीदन्तु, सर्वसम्मतं च स्यात् साहित्यशास्त्रमिति नूतनो मार्ग आदृत आनन्दवर्धनेन। स च ध्वनिसंज्ञः। मार्गेऽस्मिन् त्रय एव गुणा गुणत्वेनाद्रियन्ते, न दश। सप्तानां निरसने मम्मटस्तर्कमुपक्षिति **'केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः। अन्ये भजन्ति दोषत्वं कुत्रचिन्नततो दशे**-।।ति [8.72] काव्यप्रकाशे। एष सम्प्रदायो महामुनेर्भरतस्य। भरतेन हि दश गुणाः कल्पिताः, त एवादृता दण्डिना, द्विगुणीकृताश्च वामनेन। भामहः पुनर्मध्ये सम्प्रदायमिमं विचिच्छेद, माधुर्यप्रसादौ लक्षयित्वा, ओजश्च नामत उल्लिख्य संतुष्ट एष। अन्येषां स्पष्टं खण्डनं न दिदेश। न भवन्त्येव गुणनामका धर्माः काव्याङ्गानीति च सम्प्रदायविरोधोऽपरो वादः। नासन्निति तमिममचखण्डयद् वामनः।

भामह एव काव्यमलक्षयत् 'शब्दार्थौ सहितौ काव्यमि'-ति। एतदेव च प्राणीभूतं ध्वनिवादिषु। न स्पृश्यत एभिर्दण्डिनः काव्यलक्षणं शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली'-ति। दण्डी खलु वैदिकः। वैदिकानां हि वेदानामपि लक्षणं शब्दविशेष इत्येव। भग्न एष मार्गोः भामहेन 'गोविषाणन्यायेन' अर्थायापि लक्षणे समशीर्षिकीं दत्वा। काव्ये हि यस्य ग्रहः सोऽर्थः शब्दैकवेद्यो

भवति, प्रत्यक्षानुमानादिवेदिता अर्था अपि तदवधि काव्यकोटिं न स्पृशन्ति यदवधि न भजन्ति शब्दवेद्यत्वम्। तत्रैव च 'विभावनं' व्यापारः। अनुभवप्रमाणाकमिदं सर्वेषाम्। नायं प्रौढिवादः। प्रौढिवादत्वं तस्यैव यत्र क्रमप्राप्तावपि शब्दार्थौ समानौ काव्यलक्षणे। स च भामहः, तदनुयायिनश्च रुद्रटानन्दवर्धनाभिनवमम्मटाः।

एवं प्रथम आचार्या भरतदण्डिप्रभृतयः, ये हि 1300 वर्षाणि पूज्या आसन् सहस्रवर्षानन्तरिकेण भामहेन ते एकपद एव न्यक्कृताः। आनन्दवर्धनः पुनः शब्दमपि न्यक्कृत्य व्यदिद्युतत्। इदानीं यदि सहस्रद्वयवर्षानन्तरम् इमे मध्यवर्त्तिन इदानीन्तनैर्व्युत्पन्नैस्तर्कैर्न्यक्क्रियन्ते को नु दोषः। बालादपि सुभाषितमाद्रियमाणा वयम्। कीदृशी नः प्रवृत्तिः निरस्तागमान् प्रति प्रीतिमयी।

आनन्दवर्धनमम्मटाभ्यां वैदिको दण्डी न समादृतः। भोजराजेन पुनः स एष आचार्य औदार्येण समुद्धृतःशृङ्गारप्रकाशे। यावद् भामहोऽपि यथास्थानमादृतः। वादश्च भामहस्यैव स्वीकृतः 'शब्दार्थौ सहितौ काव्यम्' इति। एष हि श्रौत-सौगतसमाहारः। अत एव विमानितो विश्वनाथजयदेव-जगन्नाथैः। एवं नास्त्यपराधोऽद्यतनस्य विचारकस्य यदि स माध्यमिकानाचार्यान् खण्डयति। तैरादृत एव मार्गोऽस्माभिराद्रियते। अस्माकं पुनस्तर्कसङ्गतः पन्थाः। इयं काव्यव्रज्या। अथ नाट्यव्रज्यापि वीक्ष्येत।

**नाट्यशास्त्रम्**

नाट्यमपि काव्यतया गृहीतं भरतमुनिना परवर्त्तिभिश्च बहुलैराचार्यैः। तत्र नवीनानामनेके संव्यावहारिका विचाराः। ते चास्माभिर्नाट्यानुशासना- ख्येन पञ्चपर्वणा ग्रन्थेन प्रत्युपस्थापिताः। तत्र नाट्ये पञ्चसन्धयः प्रसिद्धाः।

सन्धित्वावच्छिन्नः पदार्थः पुनरस्माभिरेव नव्यन्यायादृतेन लक्षणेन योजितः। स च तृतीयस्य उन्मेषस्य द्विचत्वारिंशत्तमायाः कारिकायाः परं द्रष्टुं शक्यः। संक्षेपः पुनस्तस्यैवम्–

1. सन्धीयमानेतिवृत्तखण्डत्वमित्यभिनवगुप्तभोजप्रभृतयः

2. सम्बन्धविशेषत्वमिति धनञ्जयः

3. गौणार्थत्वावच्छिन्नप्रतियोगितानिरूपित-मुख्यार्थत्वावच्छिन्नानुयोगिताकः सम्बन्ध एव सन्धिः। तत्त्वं सन्धित्वमिति।

सन्ति नाट्ये तिस्रः परिभाषाः 1. अवस्था, 2. अर्थप्रकृतिः 3 सन्धिः इति। आसां विविक्तं लक्षणमिदंप्रथमतया नाट्यानुशासन एव निर्मितम्–

**यत्नावस्था फलावस्था काव्यावस्था यथाक्रमम्।**
**अवस्थेत्युच्यतामर्थप्रकृतिः सन्धिरेव च॥** 3.8॥

तत्रावस्थाः पञ्च- आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।' इति अर्थप्रकृतयोऽपि पञ्चैव- बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः। अर्थप्रकृतयः।।

दशरूपके नाट्यप्ररोहो वृक्षप्ररोहेणोपमितः। तथापि प्रोक्तं 'पताकास्यान्नवा क्वचिदि'-ति। भग्न इदानीं दृष्टान्तः। फलं यावद् वृक्षे यावन्त्यङ्गानि भवन्ति तानि सर्वाण्यप्यपरिहार्याणि भवन्ति। नाट्येऽपि तथैव प्राप्तमपरिहार्यत्वं सर्वेषामपि आरम्भादीनाम्। ततश्च समादृतोऽस्माभिर्नदीनद्यन्तरन्यायः–

**नदीनद्यन्तरन्यायान्मुख्यामुख्यभिदा तु या।**
**कथा-कथान्तर-द्वन्द्वस्तया कामं निरूप्यताम्।।** ना. 3.29।

अग्रेऽप्युच्यते–

**नद्यां नद्यन्तराणीव कथायां संपतन्तकि।**
**कथान्तराणि तानि स्युर्भिन्नस्रोतांसि मुख्यतः।।** 3.30।।
**यथा रामायणे बालिसुग्रीव-शबरी-कथाः।**
**कथा वा मकरन्दस्य मालतीमाधवे यथा।।** 3.31।।

यस्मिन्नितिवृत्ते कथान्तरं न भवति तत्र पताका का भविष्यतीति प्रश्ने ब्रूमः–

**'यस्मिन् कथान्तरं नास्ति काव्ये तस्मिँस्तु केवलः।**
**बीजाङ्कुरफलन्याय एव मान्यो मनीषिभिः।।** 3.32।।

प्राचीननाट्यशास्त्रे नायिकायाः प्रतिनायकस्य च स्वतन्त्रं स्थानं नास्ति। द्वावपीमौ नायकेनैवान्तर्निगीर्णौ लभ्येते। नाट्यानुशासने पुनर्द्वयोरप्यनयोः पताकात्वेन संग्रहः।

राज्ञामपि कार्याणि परिकरसापेक्षसिद्धीनि भवन्ति। ते च चेटचेट्यादयः प्रकरीत्वेन गृह्येरन्। प्रकरी नाम समुदायः। चेटचेट्यादीनां समुदायोऽपि समुचित स्थानं लब्धवानिदानीं नाट्ये।

मञ्चपीठादीनां या प्राचीना व्यवस्था सापि नियमविधिमाश्रित्य मीमांसादर्शितेन पथा निरधारि तावदेव प्रमाणं मान्यं क्रियेत यतो दीर्घेण दृश्यता श्रव्यता च न व्याहन्येत्। अधुना यदि यन्त्रसाहाय्येन प्रमाणाधिक्ये नास्ति हानिर्दृश्यश्रव्यतयोस्तर्हि तदपि मान्यमिति।

काव्य-नाट्य-नृत्य-संगीतेषु यत् सौन्दर्यं तत् किमित्यपि स्वातन्त्र्येण प्रतिपाद्यते नाट्यानुशासनस्य समाधिखण्डे–

**कविना, नटनेन, नर्त्तकेन, स्वरविद्यानिपुणेन गायनेन।**
**उपधाय समाधियोगरूपं करणप्रत्यवहारमाप्यते स्वम्।।**

–[नाट्यानु. 4.32]

अमुना समाधियोगेन यत् सामरस्यमुपपाद्यते तदेव कलानां परमोऽर्थः। उक्तं नाट्यानुशासनस्यैव समाधिखण्डे–

**यदिदं शिवशक्ति-शक्तिपात-क्रमसङ्ग-क्रम-साम्मनस्यसिद्धम्।**
**'रसना'-कटिरेचकं कलानां सकलानां तदिदं हि सामरस्यम्॥**

–[नाट्यानु. 4.38]

**अथ रससूत्रम्।**

यदिदं भरतेनोद्धृतं रससूत्रं–'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरि'–ति तदिदं संक्षिप्य प्रस्तूयते–**'रसश्चिद् भावसंयुक्ते'**– [ना. 5.38]–ति। अत्र भावपदेन विभावादयः सर्वेऽपि भावत्वावच्छिन्ना गृह्येरन्। तदुक्तम्–

**एवं च भाव इत्युक्ते गृह्येरन् निखिला इमे।**
**'रसश्चिद् भावसंयुक्ते'-त्यतः सद् रसलक्षणम्॥**

–[नाट्यानु. 5.39]

अथ महान् प्रश्नः। रससामान्यं किं लक्षणमिति। तत्रोच्यते 'रसश्चिदि'–ति। अत्र भावा वर्जिताः।

**शुद्धे रसे तु सर्वेषां भावानामस्ति वर्जना।**
**वैशेषिका रसा ये वै तेषां स्याद् भावसंयुतिः ॥**

–[नाट्यानु. 5.44]

अथ ये वैशेषिकाः शृङ्गारमुखा अष्टौ वा नव वा दश वा रसास्तेष्वपि पार्यन्तिक एष निर्विशेष एव रसः।–

**किन्तु तेष्वपि शुद्धो हि रसः पार्यन्तिकः, स चित्।**
**स्पन्दो वा स्यात् स्फुरत्ता वा निर्विशेषौ हि तौ शिवे।**

–[नाट्यानु. 4.45]

इतः परं 'महारस'–नामकस्याप्यनुभवस्य निरूपणा कृता नाट्यानुशासने–

**अयमेव रसः शुद्धो महारस इतीर्यते।**
**विरामः करणग्रामस्यासौ चिन्मात्रसंप्लवात्।**

–[नाट्यानु. 5.47]

इत्यलमधिकेनाधुनिक्येन।

**रेवाप्रसादो द्विवेदी**
5.2.2009, दिल्ली

# Problems in Reading Indus Valley Script

– Ravindra K. Vasishtha

While studying the origin and development of the Brahmi script, scholars have always thought of a writing style from which the Brahmi symbols have developed. Most commonly, it is considered that it has a link with the writing system found on the seals belonging to the Indus Valley civilization. The question of the link between these two writing systems is still unsettled. A number of concepts are produced, and a series of attempts are made, to decipher the script belonging to the Indus Valley civilization, by many scholars, like, W.M. flinder, Petrie Piccoli, Cunningham, G.R. Hunter, H. Heras, L.A. Wadell, Pran Nath, V. Hrozni, Raj Mohan Nath, Sudhanshu Kumar Ray, Fateh Singh, Shankaranand, P. Meriggi, S. Parnavitan, S.R. Rao, D.M. Barua, B.B. Chakravarty, Shankar Hazra, M.V.N. Krishna Rao, L.S. Vakankar, group of Asko Parpola, Simo Parpola, Kos Kenniemi and P. Alto, etc.

Flinders compared the Indus Valley script with the ancient Egyptian script. Piccoli compared this script with the Etruscan script. Cunningham worked out its relations with the Brahmi script. Hunter, Langdon, D.C. Sincar and Sudhanshu Kumar Ray also considered it as a source of the Brahmi script. Ray corelated Indus script with Aryans, who used Prakrit language to write on the seals. Heras attached Dravidian phonetic values to this proto-Indian script and there-upon read the inscriptions on modern Dravidian. Asko Parpola and Siemo Parpola considered it as proto-Dravidian and tried to read on the basis of Dravidian languages. Hrozny and H.P. Merrigi observed that the

symbols of the Indus script and the Hittite are similar. In his attempt, Hrozny read the names of Indo-Europian etymology and the names of Sumerians, Babylonian or Hittite gods. Fateh Singh and Shankarananda corelated the Indus Valley symbols with the Vedic culture. Shankarananda pointed out that these people were different from the invader Aryans. He observed that the western Asian scripts originated from the Indus Valley script. Fateh Singh indicated that the seals were used to print books, not for sealing job. He read its language as Sanskrit, and identified several Vedic gods and goddesses. According to him, animals in the seals, which are facing right side, belong to gods and those facing leftwards-belong to 'Asuras.' The script has been classified in four types by him-three among them read left to right and one goes right to left. Wadell compared Indus Valley script with Sumerian script. He tried to establish that the people of Indus Valley, Sumeria and Phoenesia were Aryans.

About 3000 seals are found from the vast area related to the Indus Valley civilization. Various scholars selected a number of them to read. Heras selected 1800 seals. In his studies he classified that there are 290 composit signs, which belong to the Dravid culture. He read some signs and published them in the "Indian Culture (Vol. III in 1937)". Hunter outlined 234 basic symbols after studying writing on 750 seals in his thesis. Gadd and Smith distinguished about 400 signs, S.K. Ray identified 288 basic signs. Pran Nath claimed to have read 78 inscriptions. He adopted tantrik signs to read them. A.H. Dani enlisted 537 symbols in all out of which 63 are said to be numerals. He observed that these symbols are formed (i) by combining different signs and (ii) by the addition of internal or externals strokes, besides arch-like signs. Shankarananda observed, there are 400 symbols, 118 compounds and 469 words, used in the Indus Valley seals. He also claimed that the western Asian scripts originated from the Indus Valley script. M.V.N. Krishna Rao classified about 400 basic symbols, which are

pictographs, symbolic, basic and compounded symbols. This observation came out of 1675 symbols, he had studied. He claimed that these are written from right to left. Their language is a mixture of Sanskrit and Prakrit languages. He adopted 'acrophony' system to read these symbols. B.B. Chakravarty tried to decipher 511 seals. He observed that these seals just contain personal nouns. All the attempts to interpret the Indus Valley script mentioned are based on comparison with other known scripts. Meriggi, on the contrary, endeavoured to understand the text in the first place purely by content, through interpreting the individual ideograms. He saw in them mainly stamping inscriptions from administrative purposes, like grain deliveries. He did not assign a definite phonetic value to any sign.

Hrozny claimed that it is a picture script, the signs of which, for the most part already have phonetic values. Sudhanshu Kumar Ray observed that most of the signs are combination of simple basic forms, with diacritical marks of some kind. He compared them with the Indian method of indicating vowels and forming ligatures. Indus script, besides ideographic basic forms, contains phonetic determining elements, i.e., signs for syllables and simple sounds. He observed that characters found at Mohen jo daro are syllabic and those at Harappa are alphabetic. A.H. Dani's study also calls the Indus script as quasi-pictographic. The Indus valley writing style, is also considred as either:

- ideograpic-sign script of complex character, i.e., mixture of significant signs and phonetic elements.
- hieroghyphs-signs having a phonetic value or syllabic value.
- monosyllabic-word structure is other than that of the combination of consonants with vowels or vowels with consonants.
- polysyllabic-writing with the signs that are combined from several simple signs.
- quassi-pictigraphic, where it has a large number of

letters with a limited basic symbols and rest are their varients.

- acrophonic, where a part of the picture of an object becomes basis of a word.

Very strangely, scholars, who have seen it in different forms, also gave phonetic/alphabetic values to the symbols. Inspite of all the afforts, the Indus Valley script is still undeciphered. A number of problems are being faced to read the seals. Language, side of writing, controversy of seal or sealing are among main problems. Language of that time is totally unknown. Controversy of so called Aryan invasion has added further confusion to it. It appears such incident has not taken place. It is useless to touch so much discussed preposterous topics here. Regarding the language, it is obvious that it is a pre-Sanskrit language. A language which was Sanskritized by Panini after a series of attempts by preceding grammarians, could not be same 1500 years before Panini. Yaska in his 'Nirukta' selected 1341 words - naighantavas - to explain, but explained just 230 words. It is not by chance. Actually by the time of Yaska, most of the words of earlier nighantus became extinct. Possibly earlier 'nighantus' enlisted the words which were used by the Indus Valley people. It appears that this civilization belonged to the early age, whereas the Vedic culture was a rural culture and the Indus Valley culture was an urban one. It is still needed to corelate Indus Valley language with 'Avestan' language. Wadell, Ray, Pran Nath, Shankarananda, Fateh Singh and M.V.N. Krishna Rao have indicated its links with Sumerians, Phoenicians and Vedic Aryans. Another problem regarding the script is, whether it goes right to left or left to right. Dani suggested "on the analogy of the Egyptian hieroglyphs, as well as the fact that the animals mostly face right, it has been suggested that the direction of writing is from right to left, i.e., it begins from the side of the animals head and goes to its tail". But this analogy is not strictly followed as the face of animal is found on either side in various examples. Concept of

boustrophedon is also suggested where a line is also written from right to left. Let's see the concept of boustrophedon, in the context of the Indus Valley symbols: if it is ascertained that the recovered object is a seal, it is obvious, that writing work is done from the opposite side of the actual writing side. There could be a marginal space before starting engraving. Engraving work is very neatly and uniformly done. It does not leave any chance to let us find out from which side engraver started engraving. Distance from one symbol to other is well maintained. After observing minutely, it is seen that both directions were used to start engraving symbols. A seal (M 300)* shows that the engraving is done from right to left. When no space remained on the left side, remaining symbols are engraved above the normal line. On another seal (M 263 A)*, right side of engraving has equal distance where as the symbols are compressed on the left-end. A seal (H 103)* from Harappa is noteworthy. It contains two lines. Very first line is engraved in a usual manner, but the seal is turned up-side-down to engrave the second line. Engraving here is from right to left. On the extreme right of the second line, three symbols are written one above the other because of the lesser space on the left. Impression of these seals show the tendency of writing from left to right. But again, some seals show a tendency of engraving just opposite to this. Seals have compressed the symbols on the right side (M 266, H 39, L 11, K 4, etc.)*. Impression of these seals contain more symbols within lesser space on the left. These examples show that there was no fixed direction of starting marking symbols. Still these symbols gave definite meaning-as we find the ancient Indian Language that the use of cases and ending of verbs should be right, no matter where the word is placed in a sentence. The sentence gives exactly right meaning. A great problem relates to the level of finding a seal. If a seal level is asertained it could help in finding earlier and later version of a symbol. It will enable us to enlist developing features of symbols. Study of the symbols

covering a period of 1000 years are made as if they belong to a one short period of few years. Iravath Mahadevan's work could have been useful, but the author has generalised the symbols, i.e., symbol  is used for , , etc. It does not give a helpful hand. Another problem is that we do not understand the Mesopotamian and Phoenensian concepts of writing styles and languages. Those who have the knowledge of the two, have no knowledge of Indology. A person having knowledge of these two ends, can certainly pave way into the Indus Valley language and script.

I would like to have the attention of scholars of Indus Valley civilization, that the people of this culture had a fashion of placing 'horn' on the head of animals. Besides so called unicorn-a well discussed mythical animal, elephant (M 571)*, human being-also having a tail (M 582 and M 585)*, dog (M 543)*, etc., - all these have a horn on their heads; human beings have two horns.

Lastly, when there is no source which could lead us to a result, what can we do? Just Imagination, Imagination!!!

---

Numbers of the seals are taken from the Corpus of Indus Seals and Inscriptions, Part I. Collection in India; Ed. By Jagat Pati Joshi and Asko Parpola, Helsinki, 1987.